# NIRUKTA AND MIMAMSA

**STUDY MATERIAL**

**II YEAR**

**PAPER - X**

*For*

**M.A.SANSKRIT**

**(2014 ADMISSION ONWARDS)**

**UNIVERSITY OF CALICUT**

**SCHOOL OF DISTANCE EDUCATION**

Calicut University P.O, Malappuram, Kerala, India 673 635

# UNIVERSITY OF CALICUT

**SCHOOL OF DISTANCE EDUCATION**

**STUDY MATERIAL**

**SECOND YEAR**

# MA SANSKRIT

## (2014 ADMISSION ONWARDS)

**PAPER - X : NIRUKTA AND MIMAMSA**

***Prepared by :***

***Smt.Jayamole.S.***
*Assistant Professor on contract,*
*School of Distance Education, University of Calicut.*

*Layout: SDE 'H' Section*
©
Reserved

# विषयसूची


| | |
|---|---|
| **यूणिट् १ - निरुक्तम्-प्रथमोऽध्यायः** | **५-१४** |
| १.प्रथम पाद | ५ |
| २.षट्भावविकाराः | ५-६ |
| ३.द्वितीय पाद | ६-८ |
| ४.तृतीय पाद | ८-१० |
| ५.चतुर्थ पाद | १०-११ |
| ६.पञ्चम पाद | ११-१४ |
| ७.दैवतम् | १४ |
| **यूणिट् २ मीमांसा मानमेयोदयः (प्रत्यक्षम्,अनुमानम्)** | **१५-४६** |
| १.प्रमाणसामान्यम् | १६-१८ |
| २.प्रमाणविशेषाः | १९ |
| ३.प्रत्यक्षम् | १९-२४ |
| **अनुमानम्** | **४५-४६** |

# निरुक्तम्

## प्रथमाध्यायः

### प्रथमपाद

समम्नायः समाम्नातः। स व्याख्यातव्यः । तमिमं समाम्नायं 'निघण्डव' इत्याचक्षते । निघण्डवः कस्मात् ? निगमा इमे भवन्ति – छन्दोभ्यो समाहृत्य समाहृत्य समाम्नातः । निगन्तव एव सन्तोनिगमनात् निघण्डव उच्यन्ते इति औपमन्यवः । अपि वा आहननादेव स्युः । समाहृता भवन्ति । यद्वा, समाहृता भवन्ति । तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च, तानीमानि भवन्ति – तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति – भावप्रधानमाख्यातम्, सत्वप्रधानानि नामानि । तद्यत्र उभे भावप्रधाने भवतः । पूर्वापरीभूतं भावमाख्यातेनाचष्टे । व्रजति पचतीत्युपक्रमप्रभृति अपवर्गपर्यन्तम् । मूर्तं सत्वभूतं सत्वनामभिः, व्रज्या पक्तिरिति । अदः इति सत्वानामुपदेशः । गौरश्वः पुरुषो हस्तीति, भवतीति भावस्य, आस्ते शेते व्रजति तिष्टति इति ।।

इन्द्रियनित्यं वचनमौदुम्बरायणः ।।

तत्र चतुष्ट्वं नोपपद्यते । अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः । शास्त्रकृतो योगश्च । व्याप्तिमत्वात्तु शब्दस्य अणीयत्वाच्च शब्देन संज्ञाकरणं व्यावहारार्थं लोके । तेषाम् मनुष्यवद् देवताभिधानम् । पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे ।

### षट् भावविकाराः-

षट् भावविकारा भवन्तीति वार्ष्यायणिः । जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति । जायते इति पूर्वभावस्यादिमाचष्टे – न प्रतिषेधति । अस्तीत्युत्पन्नस्य सत्वस्यावधारणम् । विपरिणमते इति अप्रच्च्यवमानस्य तत्वाद्विकारम् । वर्धते इति

स्वाङ्गाभ्युदम् । संयौगिकानां वाऽर्थानाम् । वर्धते इति विजयेनेति वा, शरीरेणेति वा । अपक्षीयते इति एतेनैव व्याख्यातः प्रतिलोमम् । विनश्यतीति अपरभावस्य आदिम् आचष्टे । न पूर्वभावमाचष्टे, न प्रतिषेधति ।

अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्म आह । ते यथावचनमभ्यूहितव्याः । न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः । नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति उच्चावचाः पदार्थात् भवन्ति इति गार्ग्यः । तद्य एषु पदार्थः प्राहुरिमे तन्नामाख्यातयोरर्थविकिरणम् ।

आ इत्यर्वागर्थे । प्र परा इत्येतस्य प्रातिलोम्यम् । अभीत्याभिमुख्यम् । प्रतीत्येतस्य प्रातिलोम्यम् । अति- सु इत्यभिपूजितार्थे । निर्दुरित्येतयोः प्रातिलोम्यम् । नि अव् इति विनिग्रहार्थीयौ । उत् इत्येत्योः प्रातिलोम्यम् । समित्येकीभावम् । वि अप इत्येतस्य प्रातिलोम्यम् । अनु इति सादृश्यापरभावम् । अपीति संसर्गम् । उप् इत्युपजनम् । परीति सर्वतोभावम् । अधीत्युपरिभावम् । ऐश्वर्यं वा । एवमुच्चावचनार्थान् प्राहुः । ते उपेक्षितव्याः ।।

## **द्वितीय - पाद**

अथ निपाताः । उच्चवचेष्वर्थेषु निपतन्ति । अप्युपमार्थे । अपि कर्मोपसंग्रहार्थे । अपि पदपूरणाः । तेषामेते चत्वार उपमार्थे भवन्ति ।

इवेति भाषायां चान्वध्याये च । 'अग्निरिव' , 'इन्द्र इव' इति । नेति प्रतिषेधार्थीयो भाषायाम् । उभयमन्वध्यायम् । 'नेन्द्रं देवममंसत' इति प्रतिषेधार्थीयः । पुरस्तादुपचारस्तस्य यत्प्रतिषेधति । 'दुर्मदासो न सुरायाम्' इत्युपमार्थीयः । उपरिष्टादुपचारस्तस्य येन उपमिमीते ।

चिदित्येषोऽनेककर्मा । 'आचार्यश्चिदिदं ब्रूयात्' इति पूजायाम् । आचार्यः आचारं ग्राहयति । आचिनोति अर्थान् । आचिनोति बुद्धिमिति वा । 'दधिचित्' इत्युपमार्थे । 'कुल्माषांश्चिदाहर' इत्यवकुत्सिते । कुल्माषाः कुलेषु सीदन्ति । 'नु'इत्येषो अनेककर्मा । 'इदं नु करिष्यति इति हेत्वपदेशे' । 'कथं नु करिष्यति इति' इत्यनुपृष्टे । 'नन्वेतदाकर्षीत्' इति च । अथाप्युपमार्थे भवति । 'वृक्षस्य नु ते पुरुहूत

! वयाः’ वृक्षस्य इव ते पुरुहूत ! शाखाः । वयाः शाखाः वेतेः । वातायनाः भवन्ति । शाखाखशयः । शक्नोतेर्वा ।

अथ यस्य आगमात् अर्थपृथक्त्वम् अह विज्ञायते, न तु औद्देशिकमिव, विग्रहेण पृथक्त्वात्, स कर्मोपसंग्रहः ।

‘च’ इति समुच्चयार्थः । उभाभ्यां सम्प्रयुज्यते । ‘अहं च त्वं च वृत्रहन्’ इति । एतस्मिन्नेव अर्थे ‘देवेभ्यश्च पितृभ्यश्च आ’ इति आकारः । ‘वा’ इति विचारणार्थे । ‘हन्ताहं पृथिवीमिमां निदधानीह वेह वा’ इति । अथापि समुच्चयार्थे भवति ।

‘वायुर्वा त्वा मनुर्वा त्वा’ इति । ‘अह’ इति च, ‘ह’ इति च, विनिग्रहार्थीयौ,पूर्वेण सम्प्रयुज्येते । ‘अयम् अहं इदं करोतु,अयमिदम्’ । ‘इदं ह करिष्यति’, ‘इदं न करिष्यति’ इति । अथापि उकारः एतस्मिन्नेव अर्थे उत्तरेण । ‘मृषा इमे वदन्ति, सत्यम् उ ते वदन्ति इति । अथापि पदपूरणः । ‘इद्मु’, ‘तदु’ इति ।

‘हि’ इत्येषोऽनेककर्मा । ‘इदं हि करिष्यति’ इति हेत्वपदेशे । ‘कथं हि करिष्यति’ इति अनुपृष्टे । ‘कथं हि व्याकरिष्यति’ इतिअसूयायाम् । ‘किल’ इति विद्याप्रकर्षे । ‘एवं किल’ इति । अथापि ‘न’ ‘ननु’ इत्येताभ्यां संप्रयुज्यते अनुपृष्टे । ‘न किलैवम्’, ‘ननु किल एवम्’ । ‘मा’ इति प्रतिषेधे । ‘मा कार्षीः’ । ‘मा हार्षीः’ इति च । ‘खलु’ इति च । ‘खलु कृत्वा’ । ‘खलु कृतम्’ । अथापि पदपूरणः । ‘एवं खलु तद्बभूव’ इति ।

‘शश्वत्’ इति विचिकित्सार्थीयो भाषायाम् । ‘शश्वत् एवम्’ इति अनुपृष्टे । ‘एवं शश्वत्’ इति स्वयम्पृष्टे । ‘नूनम्’ इति विचिकित्सार्थीयो भाषायाम् । उभयम् अन्वध्यायम् । विचिकित्सार्थीयश्च पदपूरणश्च । अगस्त्य इन्द्राय हविर्निरूप्य मरुद्भ्यः सम्प्रदित्सांचकार । स इन्द्र एत्य परिदेवयांचक्रे ।।

## तृतीय –पाद

न नूनमस्ति नो श्वः, कस्तदेव यदद्भुतम् ।

अन्यस्य चित्तमभिसंचरेण्यम्, उताधीतम् विनश्यति ।।

न नूनमस्ति अद्यतनम् । नो एव श्वस्तनम् । अद्य = अस्मिन् द्यवि । 'द्युः' इत्यह्नो नामधेयम् । द्योतते इति सतः । श्वः उपाशंसनीयः कालः । ह्यः हीनः कालः । कस्तद्वेद यदद्भुतम् = कः तद् वेद, यद् अद्भुतम् ? इदमपि इतरत् 'अद्भुतम्' अभूतमिव । अन्यस्य चित्तम् अभिसंचरेण्यम् = अभिसंचारि । अन्यः = नानेयः । चित्तं चेततेः । उताधीतं विनश्यति इति = अपि आध्यातं विनश्यति । आध्यातं = अभिप्रेतम् ।। अथापि पदपूरणः ।।

नूनं सा ते प्रतिवरं जरित्रे, जुहीयदिन्द्र दक्षिणा मघोनि ।

शिक्षा स्तोतृभ्यो माति धग्भगो नो, बृहद्वदेम विदधे सुवीराः ।।

सा ते प्रतिदुग्घं वारं जरित्रे । वरो वरयितव्यो भवति । जरिता = गरिता । दक्षिणा । मघोनि = मघवति । मघमिति धननामधेयम् । मंहतेः दानकर्मणः । दक्षिणा दक्षतेः समर्धयति कर्मणः । व्यृद्धं समर्थयति इति । अपि वा प्रदक्षिणागमनात् दिशमभिप्रेत्य । दिक् हस्तप्रकृतिः । दक्षिणो हस्तो दक्षतेः उत्साहकर्मणः । दाशतेर्वा स्यात् दानकर्मणः । हस्तो हन्तेः । प्राशुः हनने ।।

देहि स्तोतृभ्यः कामान् । मा अस्मान् अतिदंहीः । मा अस्मान् अतिहाय दाः । भगो नोऽस्तु । वृहद् वदेम स्वे वेदने । भगो भजतेः । बृहद् इति महतो नामधेयम् । परिवृढं भवति । वीरवन्तः । कल्याणवीराः वा । वीरो वीरयति अमित्रान् । वेतेर्वा स्याद् गतिकर्मणः । वीरयतेर्वा ।।

'सीम्' इति परिग्रहार्थीयो वा । पदपूरणो वा । 'प्र सीमादित्यो असृजत्' । प्रासृजत् इति वा । प्रासृजत् सर्वतः इति वा । 'वि सीमतः सुरुचो वेन आवः' इति च । व्यावृणोत् सर्वतः आदित्यः । सुरुचः आदित्यरश्मयः सुरोचनात । अपि वा, 'सीम' इत्येतत् अनर्थकम् उपबन्धम् आददीत पञ्चमीकर्मानम् । सीम्नः = सीमतः – सीमान्तः – मर्यादातः । सीमा = मर्यादा, विशीव्यति देशाविति ।। 'त्व' इति विनिग्रहार्थीयं सर्वनाम अनुत्तमम् । अर्धनाम् इत्येके ।।

ऋचां त्वः पोषमास्ते पुपुष्वान्, गायत्रं त्वो गायति शक्करीषु ।

ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ।।

इति ऋत्त्विक्कर्मणां विनियोगं आचष्टे । ऋचां एकः पोषं आस्ते पुपुष्वान् – होता । ऋक् = अर्चनी । गायत्रम् एको गायति शक्करीषु – उद्गाता । गायत्रं गायतेः स्तुतिकर्मणः । शक्कर्यः ऋचः शक्नोतेः । 'तद् याभिः वृत्रमशकद् हन्तुं तत् शक्करीणां शक्करीत्वम्' – इति विज्ञायते ।

ब्रह्मा एको जाते जाते विद्यां वदति । ब्रह्मा सर्वविद्यः । सर्वं वेदितुं अर्हति । ब्रह्मा परिवृढः ब्रह्मा श्रुततः । ब्रह्म परिवृढं सर्वतः । यज्ञस्य मात्रां विमिमीते एकः अध्वर्युः । अध्वर्युः = अध्वरयुः । अध्वरं युनक्ति । अध्वरस्य नेता । अध्वरं कामयते इति वा । अपि वा अधीयाने 'युः' उपबन्धः । अध्वरः इति यज्ञनाम । ध्वरतिः हिंसाकर्मा । तत्प्रतिषेधः ।।

निपात इत्येके तत्कथम् । अनुदात्तप्रकृति नाम स्यात् ? दृष्टव्यं तु भवति । 'उत त्वं सख्येस्थिरपीतमाहुः' इति द्वितीयायाम् । 'उतो त्वस्मै विसस्रे' इति चतुर्थ्याम् । अथापि प्रथमाबहुवचने ।।

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।

आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ।।

अक्षिमन्तः  कर्णवन्तः सखायः । 'अक्षि' चष्टेः । अनक्तेः इति आग्रायणः । 'तस्मादेते व्यक्ततरे इव भवतः' इति ह विज्ञायते । 'कर्णः' कृन्ततेः । निकृत्तद्वारो भवति । ऋच्छतेः इति आग्रायणः । ऋच्छन्ति इव, खे उदगन्तामिति ह विज्ञायते ।

मनसां प्रजवेषु असमाः बभूवुः । आस्यदघ्ना अपरे । उपकक्षदघ्नाः अपरे । आस्यम् अस्यतेः ।आस्यन्दते एनत् अन्नम् इति वा । दघ्नं दघ्यतेः स्रवतिकर्मणः । दस्यतेः वा स्यात् । विदस्ततरं भवति । प्रस्नेयाः = ह्रदा इव एके प्रस्नेया ददृशिरे । स्नानार्हाः । ह्रदो ह्रादते शब्दकर्मणः । ह्रादने वा स्यात् शीतीभावकर्मणः ।।

निष्ट्वक्त्रासश्चिदिन्नरो भूरितोका वृकादिव ।

बिभ्यस्यन्तो ववाशिरे शिशिरं जीवनाय कम् ।।

शिशिरं जीवनाय । शिशिरं शृणातेः शम्नातेः वा । 'एमेनं सृजता सुते' । आसृजत एनं सुते । 'तमिद्वर्धन्तु नो गिरः' । तं वर्धयन्तु नो गिरः स्तुतयः । गिरो गृणातेः । 'अयमु

ते समतसि’ । अयं ते समतसि । इवोऽपि दृश्यते । ‘सुविदुरिव’ । ‘सुविज्ञायेते इव’ । अथापि ‘न’ इति एषः ‘इत्’ इत्येतेन संप्रौज्यते परिमये ।।

हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान् ।

शचीर्मदन्त उत दक्षिणाभिर्नेज्जिह्यान्त्यो नरकं पताम ।।

नरकं नि अरकम् । नीचैः गमनम् । न अस्मिन् रमणं स्थानम् अल्पम् अपि अस्ति इति वा । अथापि ‘न् च’ इत्येष ‘इत’ इत्येतेन् सम्प्रयुज्यते अनुपृष्टे । ‘न चेत्सुरां पिबन्ति’ इति । सुर सुनोतेः । एवम् उच्चावचेषु अर्थेषु निपतन्ति । ते उपेक्षितव्याः ।।

## चतुर्थ-पाद

इति इमानि चत्वारि पदजातानि अनुक्रान्तानि नामाख्याते चोपसर्गनिपाताश्च । तत्र नामानि आख्यातजानि इति शाकटायनः नैरुक्तसमयश्च । न सर्वाणि इति गार्ग्यः वैयाकरणानां चैके ।।

तद् यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेन अन्वितौ स्यातां.....संविज्ञातानि तानि । यथा गौः अश्वः पुरुषः हस्तीति । अथ चेत्सर्वाणि आख्यातजानि नामानि स्युः, यः कश्च तत्कर्म कुर्यात् सर्वं तत्सत्वं तथा आचक्षीरन् । यः कश्च अध्वानम् अश्नुवीत, अश्वः स वचनीयः स्यात् । यत् किंश्चित् तुन्द्यात् तृणं तत् । अथापि चेत् सर्वाणि आख्यातजानि नामानि स्युः, यावद्भिः भावैः संप्रयुज्येत तावद्भ्यः नामधेयप्रतिलंभः स्यात् । तत्र एवं स्थूणा दर्शया च आसञ्जनी च स्यात् ।।

अथापि य एषां न्यायवान् कार्मनामिकः संस्कारः, यथा चापि प्रतीतार्थानि स्युः, तथा एतानि आचक्षीरन् । पुरुषं पुरिशयः इति आचक्षीरन् । अष्ता इति अश्वम् । तर्दनमिति तृणम् । अथापि निष्पन्ने अभिव्यवहारे विचारयन्ति – प्रथनात् पृथिवी इत् आहुः । क एनाम् अप्रथयिष्यत् ? किमाधार चेति ?

अथ अनन्वितेऽर्थे, अप्रादेशिके विकारे, पदेभ्यः पदेतरार्थान् संचस्कार शाकटायनः । एते कारितं च यकारादि च अन्तकरणम् । अस्तेः शुद्धं च सकारादि च । अथापि सत्वपूर्वो भावः इति आहुः । अपरस्मात् भावात् पूर्वस्य प्रदेशो न उपपद्यते इति । तत् एतत् न उपपद्यते ।।

यथो हि नु वै एतम् । तद् यत्र स्वरसम्स्कारौ समर्थौ – प्रादेशिकेन गुणेन अन्वितो स्यातां सर्वं प्रादेशिकम् इति । एवं सति अनुपालंभ एष भवति ।

यथो एतत् । यथा चापि प्रतीतार्थानि स्युस्तथा एनानि आचक्षीरन् इति । सन्त्यल्पप्रयोगाः कृतोऽपि ऐकपदिकाः । यथा व्रतति, दमूना, जाट्यः, आट्णारः, जागरूकः, दविहोमी इति ।

यथो एतत् । निष्पन्ने अभिव्यवहारे अभिविचारयन्ति इति । भवति हि निष्पन्ने अभिव्यवहारे योगपरोष्टिः । प्रथनात् पृथिवीत्याहुः, कः एनाम् अप्रथयिष्यत् किमाधारश्च इति । अथ वै दर्शनेन पृथुः, अप्रथिता चेत् अपि अन्यैः । अथापि एवं सर्वं एव दृष्टप्रवादाः उपालभ्यन्ते ।

यथो एतत् । पदेभ्यः पदेतरार्थान् संचस्कार इति । यः अनन्विते अर्थे संचस्कार स तेन गर्ह्यः । सा एषा पुरुषगर्हा ॥

यथो एतत् । अपरस्मात् भावात् पूर्वस्य प्रदेशः न उपपद्यते इति । पश्यामः पूर्वोत्पन्नानां सत्वानाम् अपरस्मात् भावात् नामधेय-प्रतिलंभमेकेषां न एकेषाम् । यथा बिल्वादः लंबचूडकः इति । बिल्वं भरणात् वा भेदनात् वा ॥

## पञ्चम-पाद

अथापि इदमन्तरेण मन्त्रेषु अर्थप्रत्ययो न विद्यते । अर्थम् अप्रतियतो नात्यन्तं स्वर्सम्स्कारोद्देशः । तदिदं विद्यास्थानम् । व्याकरणस्य कार्त्स्न्यम् । स्वार्थसार्धकं च । यदि मन्त्रार्थप्रत्ययाय, अनर्थकं भवति इति कौत्सः । अनर्थका हि मन्त्राः । तदेतेन उपेक्षितव्यम् ।

नियतवाचोयुक्तयः, नियतानुपूर्व्याः भवन्ति । अथापि ब्राह्मणेन रूपसंपन्नाः विधीयन्ते । 'उरु प्रथस्व' इति प्रथयति । 'प्रोहाणि'इति प्रोहति । अथापि अनुपपन्नार्थाः भवन्ति । 'ओषधे त्रायस्व एनम्' । 'स्वधिते मा एनं हिंसीः' इत्याह हिंसन् ॥

अथापि विप्रतिषिद्धार्थाः भवन्ति । 'एक एव रुद्रोऽवतस्थे न द्वितीयः'+ असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम्. । 'अशत्रुरिन्द्र जज्ञिषे' + 'शतं सेना अजयत्साकमिन्द्रः' इति । अथापि जानन्तं संप्रेषयति । 'अग्नये समिध्यमानायानुब्रूहि' इति । अथापि आहुः अदितिः सर्वमिति – 'अदितिद्यौरदितिरन्तरिक्षम्' इति ।

तदुपरिष्टात् व्याख्यास्यामः । अथापि अविस्पष्टार्थाः भवन्ति । अम्यक्, यादृश्मिन्, जारयायि, काणुका इति ॥

अर्थवन्तः शब्दसामान्यात् । 'एतद्वै यज्ञस्य समृद्धं, यद्रूपसमृद्धं, यत्कर्म क्रियमाणम् ऋग्यजुः व अभिवदतीति च ब्राह्मणम्, । 'क्रीळन्तौ पुत्रैर्नप्तृभिः' । यथो एतत् । लौकिकेषु अपि एतत् । यथा – इन्द्राग्नी, पितापुत्रौ इति । यथो एतत् । 'ब्राह्मणेन रूपसंपन्नाः विधीयन्ते' इति । उदितानुवादः स भवति । यथो एतत् । 'अनुपपन्नार्थाः भवन्ति' इति । आम्नायवचनादहिंसा प्रतीयेत ॥

यथो एतत् । 'विप्रतिषिद्धार्थाः भवन्ति' इति । लौकिकेषु अपि एतत् । यथा असपत्नोऽयं ब्राह्मणः । अनमित्रो राजा इति । यथो एतत् । 'जानन्तं संप्रेषयति' इति । जानन्तम् अभिवादये । जानते मधुपर्कं प्राह । यथो एतत् । 'अदितिः सर्वमिति' । लौकिकेषु अपि एतत् । यथा – सर्वरसाः अनुप्राप्ताः पानीयम् इति । यथो एतत् । 'अविस्पष्टार्थाः भवन्ति' इति । नैष स्थाणोः अपराधः यदेनम् अन्धो न पश्यति । पुरुषापराधः न भवति । यथा जानपदीषु विद्यातः पुरुषविशेषो भवति । पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ॥

अथापि इदमन्तरेण पदभागो न विद्यते । 'अवसाय पद्वते रुद्र मृळ' इति । पद्वत् अवसम् । गावः पथ्यदनम् । अवतेः गत्यर्थस्य । असो नामकरणः । तस्मात् न अवगृह्णन्ति । 'अवसायाश्वान्' इति । स्यतिः उपसृष्टो विमोचने । तस्मात् अवगृह्णन्ति ॥

'दूतो निर्ऋत्या इदमा जगाम इति । पस्चम्यर्थप्रेक्षा वा षषट्यर्थप्रेक्षा वा । आःकारान्तम् । 'परो निर्ऋत्या आ चक्ष्व' इति । चतुर्थ्यर्थप्रेक्षा । ऐकारान्तम् । परः सन्निकर्षः संहिता । पदप्रकृतिः संहिता । पदप्रकृतिः सर्वचरणानां पार्षदानि ॥

अथापि याज्ञे दैवतेन बहवः प्रदेशाः भवन्ति । तद् एतेन उपेक्षितव्यम् । ते चेत् ब्रूयुः – 'लिङ्गज्ञाः अत्र स्मः' इति । 'इन्द्रं नत्वा शवसा देवता वायुं पृणन्ति' इति । वायुलिङ्गं च इन्द्रलिङ्गं च आग्नेये मन्त्रे । 'अग्निरिव मन्योत्विषितः सहस्व' इति । तथा अग्निः मान्यवे मन्त्रे । त्विषितः ज्वलितः । त्विषिरिति अपि अस्य ॥ दीप्तिनाम भवति । अथापि ज्ञानप्रशंसा भवति । अज्ञाननिन्दा च ॥

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।

योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपात्मा ॥

(यः वेदम् अधीत्य अर्थं न विजानाति , स्थाणु किल भारहारः अभूत् । यः अर्थज्ञः सः सकलम् इत् भद्रम् अश्नुते । ज्ञानविधूतपाप्मा नाकं, स्वर्गम् एति । )

यद् गृहीतमविज्ञातं निगतेनैव शब्द्यते ।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

स्थाणु तिष्ठतेः । अर्थः अर्तेः । अरणस्थः वा ॥

उत त्व पश्यन्न ददर्श वाचमुत त्व शृण्वमन्न शृणोत्येनाम् ।

उतो त्वस्मै तन्वम् विसस्रे जाये पत्य उशती सुवासाः ॥

अपि एकः पश्यन् न पश्यति वाचम् । अपि च शृण्वन् न शृणोति एनाम् । इति अविद्वांसम् आह अर्द्धम् । अपि एकस्मै तन्वं विसस्रे इति स्वम् आत्मानं विवृणुते ज्ञानम् । प्रकाशनम् अर्थस्य आह अनया वाचा । उपमा उत्तमया वाचा । जाया इव पत्ये कामयमाना सुवसा ऋतुकालेषु । यथा स एनां पश्यति स शृणोति । इति अर्थज्ञप्रशंसा । तस्य उत्तरा भूयसे निर्वचनाय ॥

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।

अधेन्वा चरति माययैष वाचं शुश्रुवां अफलामपुष्पाम् ॥

अपि एकं वाक्सख्ये स्थिरपीतम् आहुः रममाणं विपीतार्थम् । देवसख्ये रणीये स्थाने इति वा । विज्ञानार्थं यं न आप्नुवन्ति वाग्ज्ञेयेषु बलवत्सु अपि । अधेन्वा हि एष चरति मायया वक्प्रतिरूपया । न अस्मै कामान् दुग्धे वाक् दोह्यान् देवमनुष्यस्थानेषु । यो वाचं श्रुतवान् भवति अफलान् अपुष्पाम् इति । अफला अस्मै अपुष्पा वाक् भवति इति वा । किञ्चित्पुष्कफला इति वा । अर्थं वाचः पुष्पफलमाह । याज्ञदैवते पुष्पफले । देवताध्यात्मे वा ॥

साक्षात्कृतधर्माणः ऋषयो बभूवुः । ते अवरेभ्यः असाक्षात्कृतधर्मेभ्यः उपदेशेन मन्त्रान् संप्रादुः । उपदेशाय ग्लायन्तः अवरे बिल्वग्रहणाय इमं ग्रन्थं समाम्नासिषुः । वेदं च वेदाग्ङ्गानि च । बिल्वम् = भिल्मम् । भासनमिति वा ॥

'एतावन्तः समानकर्माणो धातवः' धातुः दधातेः । 'एतावन्ति अस्य सत्वस्य नामधेयानि' । 'एतावताम् अर्थानाम् इदम् अभिधानम्' । नैघण्डुकमिदं देवतानाम् । प्राधान्येन इदमिति । तद् अन्यदैवते मन्त्रे निपतति नैघण्डुकं तत् । 'अश्वं न त्वा

वारवन्तम्’ । अश्वमिव त्वा बालवन्तम्  । बालाः दंसवारणार्थाः भवन्ति । दंशो दशतेः ॥

‘मृगा न भीमः न कुचरो गिरिष्ठाः’ । मृगः इव भीमः कुचरः गिरिष्ठाः । मृगाः मार्गे गतिकर्मणः । भीमः बिभ्यति अस्मात् । भीष्मः अपि एतस्मादेव । कुचरः इति चरति कर्म कुत्सितम् । अथ चेत् देवताभिधानं, क्व अयं न चरति इति । गिरिष्ठाः गिरिस्थायी । गिरिः पर्वतः । समुद्गीर्णो भवति । पर्ववान् पर्वतः । पर्व पुनः पृणातेः प्रीणातेः वा । अर्धमासपर्व देवान् अस्मिन् प्रीणन्ति इति । तत्प्रकृति इतरत् सन्धिसामान्यात् । मेघस्थायी । मेघोऽपि गिरिः एतस्मात् एव ॥

**दैवतम्-**

तद् यानि नामानि प्राधान्यस्तुतीनां देवतानां तद् दैवतम् इति आचक्षते । तद् उपरिष्ठात् व्याख्यास्यामः । नैघण्डुकानि नैगमानि इह इह ॥

&&&&&&&&&&&&&&&&&&&&&&&&&

# यूणिट् २

## मीमांसा

### मानमेयोदयः(प्रत्यक्षम्, अनुमानम् )

मीमांसादर्शनस्य उपज्ञाता जैमिनिमहर्षिः भवति । मीमांसायाः अपरं नाम पूर्वमीमांसा इति भवति । वेदस्य कर्मकाण्डं भवति मीमांसादर्शनम् । अस्य प्रामाणिकः ग्रन्थः मीमांसासूत्राणि भवति । विंशत्यध्यायेषु ग्रन्थमिदं विभक्तम् । 'तदिदं विंशत्यध्यायेषु निबद्धम्' । एषु अद्धयायेषु षोडशाध्यायपर्यन्तं पूर्वकाण्डस्य कर्मविचारपरायणं अथवा वेदविहितं कर्मनुष्ठानं वर्तते । तत्तु जैमिनिकृतम् । तदन्यदध्यायचतुष्कं उत्तरकाण्डस्य ब्रह्मविचारपरायणं भवति यच्च व्यासकृतम् । मीमांसासूत्रस्य प्रसिद्धः भाष्यकर्ता शबरस्वामी भवति । भाष्यस्यास्य कुमारिलभट्टः,प्रभाकरः प्रसिद्धौ व्याख्यातौ च भवतः । कुमारिलभट्टस्य व्याख्यानं भाट्टमतमिति प्रसिद्धम् । एवमेव प्रभाकरमतस्य गुरुमतमिति ज्ञायते । आत्मनः सुखप्राप्तिरेव मीमांसादर्शन्स्य लक्ष्यं भवति । जैमिनिकृते उत्तरकाण्डे द्वादशाध्यायाः वर्तन्ते ।

मानमेयोदयमिदि पूर्वमीमांसाग्रन्थस्य मानपरिच्छेदः मेल्पुत्तूर् नारायणभट्टपादेन विरचितः । मेयपरिच्छेदस्तु नारायणपण्डितो नाम पण्डितेन च विरचितम् । "आचार्यमतपाथोधौ बालानामपि निनीषिताम् । भीमतां कोऽपि गोपालपोतः पोत इवास्तु नः" ।। इति भट्टपादेन विरचितोक्त्या मानमेयोदयस्य प्रारंभः वर्तते ।

विश्वस्मिन् समस्तानामपि पदार्थानां प्रमाणं तथा प्रमेयं च वर्तते । प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः, अर्थापत्तिः, अनुपलब्धिः इति षट्प्रमाणानि भाट्टमीमांसकाः अङ्गीकुर्वन्ति । प्रभाकरमीमांसकास्तु पञ्चप्रमाणानि अङ्गीकुर्वन्ति ।

प्रमाकरणं प्रमाणमिति तार्किकाः । यथार्थानुभवः प्रमा । अनुभवश्च स्मृतिव्यतिरिक्तं ज्ञानमिति लक्ष्यन्ति । तदनुवादस्य अप्रमाण्यसाधनात्

तद्व्यावर्तकस्य च पदस्य अत्र अभावात् अतिव्याप्तम् । अनुबूतिः प्रमाणम् । स्मृतिव्यतिरिक्ता च संविदनुभूतिरिति प्राभाकराः, तदपि भ्रमादीनां साधनात् तेषामपि स्मृतिव्यतिरिक्तत्वात् तेषु अतिव्याप्तम् । किञ्च सर्वज्ञानेष्वपि आत्मा ज्ञनस्वरूपं विषय इति त्रितयमपि प्रकाशते । सर्वत्र च आत्मस्वात्मांसयोः प्रमाणत्वं प्रत्यक्षत्वमपि अस्तीति तेषां मतम् । ततश्च स्मृतिव्यतिरिक्तज्ञानस्यैव प्रमाणत्वे स्मृतेः आत्मस्वांशयोः अप्रमाण्यं स्यात् इति अव्याप्तिः अपि अस्ति ।

अविसंवादि विज्ञानं प्रमाणम् । अविसंवादित्वं च अर्थक्रियाकारित्वमिति बौद्धाः । तत्र भूतभविष्यद्विषयस्यानुमानस्य अर्थक्रियाकारित्वाभावात् अप्रामाण्यं स्यात् । स्मृतेश्च क्वचिदर्थक्रियाकारित्वात् प्रामाण्यं स्यादिति ।

**प्रमाणसामान्यम् –**

आचार्यमतपाथोधौ बालानामपि निनीषिताम् ।

भीमतां कोऽपि गोपालपोतः पोत इवास्तु नः ।।

मानमेयविभागेन वस्तूनां द्विविधा स्थितिः ।

अतस्तदुभयं ब्रूमः श्रीमद्कौमारिलाध्वना ।।

प्रमाकरनमेवात्र प्रमाणं तर्कपक्षवत् ।

प्रमाचाज्ञाततत्वार्थज्ञानमेवात्र भिद्यते ।।

अज्ञातपदेन अत्र ज्ञातविशेषयोः स्मृत्यनुवादयोः निरासः । तत्र अनुवादानां अप्रामाण्यं तार्किकादीनां नानुमतम् ।वयं तु ब्रूमः – अनुवादो ह्यर्थपरिच्छेदे व्यवहारे वा न पूर्वज्ञानात्,अतः फलविशेषाभावात्, फलार्थं च प्रमानां स्वीकारात् स्मृत्यादिवदनुवादोऽपि बहिष्कार्य एव इति ।

ननु अज्ञातावगमस्यैव प्रमात्वे घटोऽयम् इति धारावाहिकज्ञानेषु द्वितीयादीनां अप्रमात्वं स्यात् ।

मैवं, तत्रापि अयमयमिति उत्तरोत्तरेषां कालांसानाम् अज्ञातानाम् अवगमात् उत्तरे क्षणे घटादिसद्भावस्य च पूर्वज्ञानेन अधिगतत्वात् ।

ननु कालभेदस्य औपाधिकत्वात् केनोपाधिना अवच्छिनानां कालांशानां अत्रावगम इति वक्तव्यम् । उच्यते – पूर्वपूर्वज्ञानजनितानां प्राकट्यानाम् उत्तरोत्तरज्ञानपर्यन्तमवस्थानात् तदवच्छिन्नानां कालांशानां तत्र तरावगम इति । न च प्राकट्यभेदानां सूक्ष्मत्वात् तदवच्छिन्नानां कालभेदानाम् अपि सूक्ष्मतया दुरवगमत्वं इति वाच्यम् । सूक्ष्मत्वे कमलदलशतं सूच्या युगपद्भिन्नमितिवत् सकृतवबुद्धो घट इति यौगपद्याभिमानप्रसङ्गात् । इह तु अयमयमिति पुनः पुनः क्रमेणैव प्रतीतेः धारावाहिकस्वभावसिद्धत्वाद् यौगपद्याभिमानस्य विरोध एव । तस्मात् प्राकट्यभेदानां कालभेदानां च न सूक्ष्मत्वम् । ननु प्राकट्यस्य एव अभावात् कालस्य च प्रत्यक्षत्वाभावात् कथं कालांशावगम इति चेत् न, तयोः साधयिष्यमाणत्वात् इति ।

"तत्वपदेन भ्रमसंशयादीनां अयथार्थज्ञानानां निरासः । तत्र अयथार्थज्ञानस्य अभावात् तत्वपदम् अनर्थकम् इति प्राभाकराः । एवं हि तेषां मतम् – इदं रजतम् – इत्यत्र इदम् – अगृहीतविशेषं शुक्तिसकलं गृह्यते । रजतम् – इति च रगतमात्रं स्मरयते । तयोश्च भेदाग्रहात् पुरोवर्तिनि रजतार्थेन प्रवृत्तिः, न तु शुक्तिसकलस्य रजतत्वेन गमनमस्तीति । तत्तज्ञानस्य स्वविषय एव प्रवृत्तिकरत्वनियमात् रजतज्ञानस्यापि इदंविषयत्वाभावे तत्र प्रवृत्तिर्न सिद्ध्येत् । तथा इदमेव रजतम् – इति सामानाधिकरण्यं विना न सिद्ध्येत् । इत्यादिदिशा निराकरणीयम् । तस्मात् अन्यथा ग्रहणरूपभ्रमादिज्ञानसद्भावात् तन्निरामार्थं तत्वपदम् ।

तदेवमज्ञाततत्वावगमरूपायाः प्रमायाः करनत्वेन इन्द्रियसन्निकर्षादीनां प्रमाणत्वं सिद्धम् । इह च प्रमाशब्देन लक्षणया तत्कार्यभूतस्य प्राकट्यस्यापि प्रतिपादानात् प्राकट्यरूपप्रमाकरणत्वेन ज्ञानस्यापि प्रमाणत्वमाहुः । एतावता च वयं फलप्रमाणवादिन इति गीयामहे ।

तार्किकास्तु प्रमाकरणं प्रमाणम् । यथार्थानुभवः प्रमा । अनुभवश्च स्मृतिव्यतिरिक्तं ज्ञानमिति लक्षयन्ति । तदनुवादस्याप्रमाण्यसाधनात् तद्व्यावर्तकस्य च पदस्यात्राभावात अतिव्याप्तम् । अनुभूतिः प्रमाणम्, स्मृतिव्यतिरिक्ता च संविदनुभूतिरिति प्राभाकराः, तदपि भ्रमादीनां साधनात् तेषामपि स्मृतिव्यतिरिक्तत्वात् तेष्वतिव्याप्तम् ।

किञ्च सर्वज्ञानेष्वपि आत्मा ज्ञानस्वरूपं विषय इति त्रितयमपि प्रकाशते । सर्वत्र चात्मस्वात्मांशयोः प्रमानत्वं प्रत्यक्षत्वमप्यस्तीति तेषां मतम् । ततश्च

स्मृतिव्यतिरिक्तज्ञानस्यैव प्रमानत्वे स्मृतेः आत्मस्वात्मांशयोः अप्रामाण्यं स्यादित्यव्याप्तिरप्यस्तीति ।

अविसंवादि विज्ञानं प्रमाणम् । अविसंवादित्वं च अर्थक्रियाकारित्वमिति बौद्धाः । तत्र भूतभविष्यद्विषयस्यानुमानस्य अर्थक्रियाकारित्वाभावात् अप्रामाण्यं स्यात् । स्मृतेश्च क्वचिदर्थक्रियाकारित्वात् प्रामाण्यं स्यादिति ।

तस्मादज्ञाततत्वार्थज्ञानसाधनमेव नः ।

प्रमाणमिति निर्णीतं तद्विशेषानथ ब्रुवे ।।

आचार्यस्य कुमारिलभट्टस्य विशालमतं महासागरं भवति । सागरतीरे वयं (नारायणभट्टः ) भीताः भवामः । तत्र कश्चन गोपालपोतः (पोतः इत्यस्य बालकः इत्यर्थः। अमरकोशे एवमस्ति,'यानपात्रे शिशौ पोतः' । अर्थात् पोतशब्दस्य अर्थद्वयं वर्तते । जलयानं तथा शिशुश्च । वस्तुतः गोपालपोतः इति भगवान् कृष्णः यः कैवर्तकः ।

**प्रमाणविशेषाः**

प्रत्यक्षमनुमानं च शब्दं चोपमितिस्तथा ।

अर्थापत्तिरभावश्च षट् प्रमाणानि मादृशाम् ।।

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धविशेषकौ द्वौ

भासवश्च सांख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति । भाट्टमते प्रमाणानि षट् सन्ति । ते - : १.प्रत्यक्षम्, २. अनुमानम्, ३.उपमानम्, ४. शब्दः,५.अर्थापत्तिः, ६.अनुपलब्धिः इति । चार्वाकानां मते प्रत्यक्षमिति एकमेव प्रमाणं वर्तते । बौद्धानां तथा वैशेषिकानां प्रत्यक्षम्, अनुमानम् इति प्रमाणद्वयं वर्तते । सांख्यमते त्रीणि (प्रत्यक्षम्,अनुमानं,शब्दः), उदयनाचार्यादीनां तार्किकानां मते प्रत्यक्षम्, अनिमानम्,उपमानं,शब्दः चेति चत्वारि सन्ति प्रमाणानि । उत्तरमीमांसकानां अथवा वेदान्तीनां मते प्रत्यक्षम्, अनुमानम्,उपमानम्,शब्दः,अर्थापत्तिः,अनुपलब्धिः चेति प्रमाणानि षट् सन्ति ।

## प्रत्यक्षम्

तत्र इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षम् । सन्निककर्षो नाम ज्ञानम् । कानि पुनः इन्द्रियाणि ? उच्यते- 'चक्षुरसनघ्रानस्पर्श: श्रोत्राणि मनश्चेति षडिन्द्रियाणि' ।

चक्षुः,रसना,घ्राणः,स्पर्शः,श्रोत्राणि,मनः च षट् इन्द्रियाणि भवन्ति ।

चक्षुर्नाम कनीनिकान्तर्गतं तेजोऽथ जिह्वाग्रग-

स्तोयांशो रसनं क्षितेरवयवो घ्राणं च घोणोदरे ।

सर्वाङ्गप्रसृताश्च मारुतलवास्त्वङ्नाम कर्णोदर-

व्योमैव श्रवणं मनस्तु विभु तद्देहे च कार्यावहम् ।।

तत्र रूपज्ञानस्य हेतुः भवितव्यमिति सामान्यसिद्धिः । अतः दीपादि तेजस एव रूपज्ञानहेतुत्वदर्शनात् तैजसं चक्षुः कल्प्यते । तथा रसज्ञानस्यापि कारणकल्पनायां रसव्यञ्जकत्वं अपाम् एव शुष्कवस्तुषु दृष्टमिति रसनमाप्यतया कल्प्यते । एवं चन्दनगतपार्थिवनिम्बत्वगनुलेपनस्य गन्ध अभिव्यञ्जकत्वदर्शनात् गन्ध अभिव्यञ्जकत्वेन कल्प्यमानं घ्राणं पार्थिवं भवति । व्यजनपवनस्य च अङ्गसङ्गिसलिलस्पर्शाभिव्यञ्जकत्वदर्शनात् स्पर्शोपलम्भकस्य त्वगिन्द्रियस्य वायवीयत्वम् । शब्दग्राहकतया कल्प्यस्य श्रोत्रस्य तु परिशेषादाकाशात्मकत्वम् । चक्षुरादीनां खलु इन्द्रियारम्भकेण आरब्धत्वं न दृष्टमिति तेजःप्रभृतीनां अन्येन्द्रियारंभकत्वात् तेषां श्रोत्रत्वं न भवति । भूतात्मकत्वमेव च बहिरिन्द्रियाणां दृष्टमिति अवशिष्टस्याकाशस्य भूतस्यैव श्रोत्वम् इति । तार्किकास्तु शब्दस्याकाशगुणत्वात् तद्ग्राहकस्य श्रोत्रस्याकाशत्वमिति साधयन्ति । तत्तस्य गुणत्वासिद्धेः अयुक्तम् ।

मनस्तु सुखाद्यपरोक्षज्ञानसाधनेन्द्रियत्वेन कल्प्यते । तस्य च विभुत्वं साधयिष्यते । तथापि शरीरावच्छिन्नस्यैव तस्य इन्द्रियत्वमिति तत्प्रदेश एव कार्याणि करोति । रूपादि ज्ञानेष्वपि तच्चक्षुरादिपरतन्त्रं प्रवर्तत एव । अनुमानादिषु अपि लिङ्गादिसहायमिति स्थितिः।

अत्र चक्षुःश्रोत्रयोः प्राप्यकारित्वे विवादोऽस्ति इति तयोरपि बहिरिन्द्रियत्वात् त्वगादिवत् प्राप्यकारित्वं साधनीयम् । ततश्च चक्षुषः पृथुतरपृथिवीधरादिदर्शनात् पृथ्वग्रत्वमपि तेजःस्वभावसिद्धमाश्रयणीयम् । तथा उन्मीलनक्षण एव दूरतर्शनैश्चरादिदर्शनात् व्याप्यावस्थितेन बाह्यतेजसा

निर्गमनसमय एव एकीभावः कल्पनीयः । न च बाह्यतेजसः सकलव्याप्तित्वात् केरळेभ्योऽपि गङ्गादर्शनप्रसङ्गः, अदृष्टोपगृहीतेन एव आलोकभागेन एकीभावात् । तार्किकास्तु तदिदं दूरदर्शनं वेगातिशयात् साधयन्ति । तदनन्तयोजनान्तरिष्वेष्वपि शनैश्चरादिषु झटितिदर्शनं वेगमात्रात् असंभाव्यमिति अस्माभिः उपेक्षितमस्ति । एतानि च चक्षुरादीनि अनुद्भूतरूपस्पर्शत्वात् प्रत्यक्षेण न गृह्यन्ते इति ।

सिद्धानीन्द्रियाणि । सन्निकर्षस्तु द्विविधः – संयोगः संयुक्ततादात्म्यं चेति । तत्र पृथिव्यप्तेजसां चक्षुस्त्वगिन्द्रियाभ्यां संयोगात् ग्रहणम् । वायोस्तत्वक्संयोगात् । दिङ्नभस्तमसां दृक्संयोगात् । शब्दस्य श्रोत्रसंयोगात् । आत्मनो मनःसंयोगात् । अत्र विभुनोः अपि आत्ममनसोः अजन्यसंयोगसाधनात् संयोगः । कालस्य तु उगपदादिप्रत्ययस्य कालविषयत्व इन्द्रियजन्यत्वयोः वक्ष्यमाणत्वात् तस्य च सर्वेन्द्रियजन्यत्वात् सर्वैरपि इन्द्रियैः संयोगात् ग्रहणम् ।

यदा तु चक्षुरादिसंयुक्तेषु पूर्वोक्तेषु पृथिव्यदिषु तदात्मभूतानां जातिगुणकर्मणां ग्रहणं तदा संयुक्ततादात्म्यं सन्निकर्षः । तदुक्तम् –

रूपादीनां तु संयुक्तद्रव्यतादात्म्यमेव नः ।

प्रतीतिकारणं तस्मान्न संबन्धान्तरस्पृहा ।। इति ।।

यदा तु जातिगुणकर्मगतानां सत्तारूपत्वकर्मत्वादीनां ग्रहणं तदा तेषामेव परंपरया तादात्म्यसंभवात् संयुक्ततादात्म्यमेव सन्निकर्ष इति मन्यामहे । यद्वा यथा परे रूपत्वादिग्रहणाय संयुक्तसमवेतसमवायमाश्रयन्ते तथा अस्माकमपि संयुक्त तदात्म तादात्म्यं नाम तृतीयः सन्निकर्षः अस्तु , क हानिः? जातिगुणकर्मणां च स्वाश्रयैः तादात्म्यमेव संबन्ध इति पश्चात् साधयिष्यते । तस्मात् द्वेधा त्रेधा व सन्निकर्षः ।

तार्किकाः पुनः तादात्म्यस्थाने समवायमभिषिञ्चन्तोऽन्यथा सन्निकर्षमाहुः-

१.संयोगः, २.संयुक्तसमवायः ३.संयुक्तसमवेतसमवायः, ४.समवायः, ५.समवेतसमवायः, ६.विशेषणविशेष्यभावः च ।

१.संयोगः- चक्षुरादिभिः संयोगात् द्रव्याणां ग्रहणम् ।

२. संयुक्तसमवायः- चक्षुरादिसंयुक्ते द्रव्ये संयुक्तसमवायात् गुणादीनां ग्रहणम् ।

३. संयुक्तसमवेतसमवायः - संयुक्ते द्रव्ये समवेतेषु गुणादिषु संयुक्तसमवेतसम्वायात् गुणत्वादीनां ग्रहणम् ।

४. समवायः - शब्दस्य च आकासगुणत्वात् आकाशात्मकेन श्रोत्रेण समवायात् ग्रहणम् ।

५. समवेतसमवायः - शब्दत्वस्य तु श्रोत्रसमवेते शब्दे समवेतसमवायात् ग्रहणम् ।

६. विशेषणविशेष्यभावः- अभावस्य तु भावधर्ममूर्तयोः संयोगसमवाययोः अभावात् संयुक्तभूतलादिविशेषणविशेष्यरूपसन्निकर्षेण ग्रहणम् ।

तथा एव समवायस्यापि अद्रव्यत्वेन संयोगाभावात् समवायान्तराश्रयणे अनवस्थाप्रसङ्गात् विशेषणविशेष्यभाव एव सन्निकर्ष इति ।

तत्राद्यं त्रिविधं तावन्नाममात्रेण भिद्यते ।

समवायादयस्त्वन्ये सन्निकर्षा निराश्रयाः ।।

शब्दस्य हि श्रोत्रगुणत्वाभावात् समवायाख्यः समवेतसमवायाख्यः च सन्निकर्षः निरवकाशः । अभावस्य च प्रत्यक्षत्वाभावात् समवायस्य च शशशृङ्गायमाणत्वात् विशेषणविशेष्यभावसन्निकर्षः अपि हेयः । किं च चक्षुःसंयुक्तेन अर्थेन अभावसमवाययोः विशेषणविशेष्यभावसन्निकर्षो न संभवति । दण्डी पुरुष इत्यादौ संबन्धान्तपूर्वकस्यैव विशेषणविशेष्यभावस्य दर्शनात् भावसमवाययोः च अर्थेन संबन्धान्तर अभावादिति ।

प्राभाकरस्तु संयोगः, संयुक्तसमवायः, समवायः इति त्रेधा सन्निकर्षमाहुः । तन्मते रूपत्वादीनामभावात् समवेतसमवायोऽपि नाश्रयणीय इति । तदपि मतं रूपत्वादीनां साधनात् तार्किकैरेव निराकृतम् । तस्मादुक्तप्रकार एव सन्निकर्ष इति ।

तच्च इन्द्रियसन्निकर्षजं ज्ञानं द्विविधं निर्विकल्पकं सविकल्पकं चेति । तत्र इन्द्रियसन्निकर्षान्तरमेव द्रव्यादिस्वरूपमात्रम् अगाहि शब्दानुगमशून्यं यत् संमुग्धज्ञानं जायते, तद् विशिष्टकल्पनाभावात् निर्विकल्पकमित्युच्यते । यत्तु तदनन्तरं शब्दस्मरणसहकृतं जात्यादिविशिष्टवस्तुविषयं रक्तोऽयं घटोऽयं- इत्यादि व्यक्तविज्ञानं तद् सविकल्पकम् ।

तत्र शाब्दिका (बौद्धाः)निर्विकल्पकं नास्ति इत्याहुः । तदुक्तम्-

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । इति ।

तदयुक्तम्, पूर्वमर्थदर्शनाभावे शब्दस्मरणस्य हेत्वभावप्रसग्ङ्गात् । सौगतास्तु निर्विकलपकमेव प्रत्यक्षमाश्रित्य सविकल्पकस्य प्रमाणत्वं प्रत्यक्षत्वं च नास्तीत्याहुः । तदप्ययुक्तम्,तस्य प्रत्यक्षतया लोकसिद्धस्य निषेधे लोकविरोधात् । तदुक्तम्-

चन्द्रशब्दाभिधेयत्वं शशिनो यो निषेधति ।

स एव सविकल्पस्य प्रत्यक्षत्वं निवारयेत् ।। इति ।

किं च सविकल्पकानन्तरमेव अर्थक्रियादर्शनात् तस्य अर्थक्रियाकारित्वलक्षणं प्रमाणत्वं दुर्निवारम् ।

ननु अर्थक्रियाकारित्वमस्य अर्थतः अतिविप्रकर्षाभावात् दैवगतमेव,न स्वाभाविकम्,यथाहुः-

मणिप्रदीपप्रभयोः मणिबुद्ध्याभिधावतोः

मिथ्याज्ञानविशेषेऽपि विशेषोऽर्थक्रियां प्रति ।।इति ।

वस्तुतः तु अयं विकल्पः मिथ्या, अवस्तुभूत सामान्यादि विषयत्वादिति चेत् नैवम्, अनुमानविकल्पस्यापि अप्रामाण्यप्रसङ्गात् सामान्यादेः वस्तुतत्वस्य साधयिष्यमाणत्वात् च, अतः प्रमाणमेव सविकल्पकम् ।

ननु तथापि कथमस्य प्रत्यक्षशब्दवाच्यत्वं निर्विकल्पकव्यवधानेन साक्षाद् अक्षजत्वाभावात्। परंपरया अक्षजस्य प्रत्यक्षत्वे अनुमानादीनामपि प्रत्यक्षत्वप्रसग्ङ्गात् । मैवम्,सविकल्पकस्यापि निर्विकल्पकवदेव साक्षादक्षजत्वात् । यथा आहुः आचार्याः-

ताश्च इन्द्रियानुसारेण जायन्ते पञ्च कल्पनाः।

यदि त्वालोच्य संमील्य नेत्रे कश्चिद्विकल्प्येत् ।

प्रत्यक्षं नैव मन्यन्ते तल्लौकिकपरीक्षकाः ।। इति ।

अपि च परंपरया अक्षजत्वेऽपि नानुमानादिषु प्रत्यक्षत्वप्रसङ्गः । पङ्गजादिष्विव योगरूढ्स्वीकारेण अनुमानादिषु प्रत्यक्षशब्दस्य अप्रवृत्तेः ।

अत्र गुरुराह – न पङ्कजादिषु रूढिरस्ति अवयवशक्त्यैव पद्मे वृत्युपपत्तेः । कुमुदादादिषु अप्रवृत्तिस्तु तेषु अप्रयोगादेव भविष्यति इति । तद् अयुक्तम्,

पङ्कजशब्दस्य पद्मे वृत्तौ का सामग्री इति चिन्तायां योगमात्रस्य कुमुदादिष्वपि सद्भावेन व्यभिचारात् रूढिरपि सामग्रीत्वेन कल्प्या, योगश्च प्रतीतो न हातुं शक्यः, इत्युभयसिद्धेः । निर्विकल्पकसविकल्पकयोरेव प्रत्यक्षशब्दवाच्यत्वं न अक्षापेक्षाणाम् अपि अनुमानादीनाम् इति सिद्धम् ।

सविकल्पकेन च द्रव्यजातिगुणकर्मनामभिः पञ्चधा विकल्पो भवति । यथा 'वेणुमानयम्','गोपोऽयम्', 'श्यामोऽयम्', 'गायत्ययम्', 'गोविन्दोऽयम्' इति ।

प्रत्यभिज्ञाप्रत्यक्षमपि षष्टो विकल्प इति केचित् । तन्न,नामकल्पनायाम् अन्तर्भावात् । नाम्ना हि पूर्वमनुभूतरूपे स्मारिते तद्रूपविशिष्टतया अर्थस्य कल्पना नाम कल्पना इति उच्यते । तेन गोविन्दोऽयम्-इत्यस्य अयमर्थः – योऽस्माभिःगोविन्दशब्दवाच्यतया पूर्वं गृहीतः,स एवायम् – इति । तु शब्दवाच्यत्वम् अतन्त्रीकृत्य पूर्वापररूपयोः ऐक्यावगम एव तात्पर्यम्,तदा स एवायम्- इति प्रत्यभिज्ञा स्पष्टा भवति । सा च प्रत्यभिज्ञा संस्कारसहितेन इन्द्रियेण एकज्ञानत्वेन जायते । तथा च स इति अयमिति च द्वे भाने जन्येते । तत्र स इति भानजनशक्तिः संस्कारकृता । अयम्- इति भानजननशक्तिः इन्द्रियकृता इति अलम् अनेन ।

इह च प्रत्यक्षज्ञानेषु विवक्षाभेदेन इन्द्रियस्य तत्सन्निकर्षस्य ज्ञानस्य वा करणत्वं भवति ,अतः सिद्धम्-इन्द्रियसन्निकर्षजं ज्ञानं प्रत्यक्षम् इति ।

गुरुस्त्वाह- साक्षात्प्रतीतिः प्रत्यक्षम् । तच्च मेयामृतप्रमास्वरूपमिति त्रिपुटं भवतीति । तत्र किमिदं साक्षात्वं नाम् ?

ननु साक्षात् धीः स्वरूपधीः । अक्षात् हि स्वेनैव रूपेण भानम् । लिङ्गादिभ्यस्तु परसंबन्धिरूपेण एव अग्न्यादीनां भानाद् असाक्षत्वम् – इति चेत्, तर्हि नामादिपरसंबन्धिरूपेण भानात् सविकल्पकस्य असाक्षत्वं स्यात् । अथ तत्र परसंबन्धिरूपभाने सत्यपि स्वरूप धीः अपि अस्ति – इति उच्यते,तर्हि अनुमानादिषु अपि तथा अभावात् साक्षात्वं स्यात् । आत्मस्वात्मनोः तु सर्वज्ञानेषु प्रत्यक्षत्वकथनं निराकरिष्यामः । इत्यास्तामेतत् ।

कल्पनापोढम् अभ्रान्तं प्रत्यक्षम्- इति बौद्धाः । कल्पनापोढप्देन सविकल्पानां निरासः । अभ्रान्तपदेन निर्विकम्पकेऽपि भ्रमत्वेन अभिमतानां केशोण्डुकादिज्ञानानामति,तदपि सविकल्पकस्य प्रत्यक्षत्वसाधनादव्याप्तमिति ।

तत्पुनः भूत-भविष्यदादि विषयं योगिज्ञानम् ईश्वरज्ञानं च इन्द्रियसन्निकर्शत्वाभावेऽपि अपरोक्षमस्ति इत्,तत्संग्रहणाय अपरोक्षप्रमाव्याप्तं प्रत्यक्षं इति लक्षयितव्यम्- इति तार्किकैः उक्तम् । तदपि अयुक्तम्, प्रत्यक्षस्य विद्यमान उपलंभ नियमाद् भूतादीनां प्रत्यक्षत्वस्य अनुपपत्तेः, तस्माद् अस्मदुक्तं प्रत्यक्षलक्षणं रमणीयम् इति ।

इन्द्रियव्यतिरिक्तानि द्रव्याण्येषां च जातयः ।

प्रायश्च गुणकर्माणि प्रत्यक्षाणि इति वक्ष्यते ।।

------------------------------

# द्वितीयः अध्यायः

## अनुमानम्

व्याप्यदर्शनात् असन्निकृष्तार्थज्ञानमनुमानम्,यथा पर्वते धूमवत्वदर्शनात् अग्निमत्वज्ञानम् । किमत्र धूमस्य व्याप्यत्वम्? उच्यते-यद्यतो चह्निनर्न वर्तते तत्तस्य व्याप्यम् । धूमश्च दहनादन्यत्र न वर्तत इति धूमस्य व्याप्यत्वम् । दहनश्च धूमादन्यत्रापि वर्ततेऽङ्गारावस्थायामिति तस्य व्यापकत्वमेव । तदियमग्निधूमयोःअन्योन्यव्यास्यभावात् विषमव्याप्तिः । क्वचित् समव्याप्तिः अपि अस्ति ,यथा कृतकत्वानित्यत्वयोः। तत्र खलु कृतकानां सर्वेषाम् अनित्यत्वमस्ति, अनित्यानां सर्वेषां कृतकत्वमपि अस्तीति समव्याप्तिरेव ।

का पुनरियं व्याप्तिः? उच्यते-स्वाभाविकः सम्बन्धो व्याप्तिः । स्वाभाविकत्वं च उपाधिराहित्यम् । उपाधिरिति च साक्षात् प्रयोजकं हेत्वन्तरमुच्यते । तद् सद्भावे हि तद्द्त्तमेव साध्यसंबन्धं क्वचिल्लभमानः प्रस्तुतो हेतुः स्वयमेव अवसाधको भवति । तद् यथा –अग्निषोमीयहिंसाः अधर्मः ,हिंसात्वाद्,बाह्यहिंसादिवत् – इति अवैदिकानां सांख्यानां च प्रयोगः । तत्र निषिद्धत्वमुपाधिः । तदेव हि अधर्मत्वस्य साक्षात्प्रयोजकम् । बाह्याहिंसानामपि च निषिद्धत्वकृतमेव अधर्मत्वमिति क्रतुहिंसायाः निषिद्धत्वाभावे हिंसात्वमात्रेन अधर्मत्वं न सिद्ध्यति इति ।

साधनाव्यापक्त्वे सति साध्यसमव्याप्त उपाधिः – इति तस्य लक्षणम् । निषिद्धत्वं हि साधनभूतहिंसात्वदेशे सर्वत्र न वर्तते, क्रतुहिंसायां निषिद्धत्वाभावात् । साध्यभूतेन च अधर्मत्वेन निषिद्धत्वस्य समव्याप्तिरस्ति- निषिद्धानाम् सर्वेषामपि अधर्मत्वाद्, अधर्मभूतानां च सर्वेषां निषिद्धत्वादिति ।

तत्सामग्राकत्वं महानसत्वं पर्वतान्यत्वं च अग्न्यनुमितौ उपाधिर्मा भूत् इति तद्विशेषणत्रितयम् । अत्र यदि साध्यसमवाप्त उपाधिरित्येवोच्येत,तर्हि धूमत्वानेकाग्निमत्वे साध्यमाने अग्निसामग्रीकत्वमुपाधिः स्यात् । अस्ति हि तस्य अग्निना समव्याप्तिः, अतः तस्मिन् वृत्यर्थमुक्तं साधनाव्यापक इति । अग्निसामग्री हि साधनभूतस्य धूमस्य व्यापिकैव । धूमे सति सर्वत्र अग्निसामग्रय्या अवश्यं भावात् ।

अतः तन्निवृत्यर्थं साध्यव्यापकत्वमश्रयणीयम् । न् हि महानसत्वस्य अग्निव्यापकत्वमस्ति, मठादिषु अग्निसद्भावेऽपि तदाभावात् । अथ यदि साधनव्यापकत्वे सति साध्यव्यापक उपाधिरित्येव उच्येत,तथापि पर्वतेतरत्वमुपाधिः स्यात्, पर्वतेतरत्वं विनापि पर्वते धूमस्य दर्सनेन साधनाव्यापकत्वात्, अग्निमत्वेन पूर्वमवधारितानां सर्वेषामपि पर्वतेतरत्वेन साध्यव्यापकत्वस्यापि सद्भावात् । अतः तन्निव्र्त्त्यर्थं समशब्दः । न हि तस्याग्निना समव्याप्तिरस्ति, पर्वतेतरेषां सर्वेषां अग्निमत्वाभावादिति ।

अन्यत्र वा विशेषणकृत्यं दर्शयितव्यम्-यदि साध्यसमव्याप्त एवोपाधिः स्यात्, तर्हि शब्दोऽनित्यः जन्यत्वाद्, खटवत् इत्यत्र सकर्तृकत्वमुपाधिः स्याद्,अनित्यत्वसकर्तृत्वयोः समव्याप्तिसद्भावात् । अतः तस्मिन् निवृत्यर्थमुक्तम्- साधनाव्यापक इति । सकर्तृकत्वं हि साधनाभिमतस्य जन्यत्वस्यापि व्यापकमिति साधनव्यापकत्वात् अनुपाधित्वम् । साधनाव्यापकस्यय एव उपाधित्वे तु तत्रैव सावयवत्वं घटवत्वम्- इत्यादिरुपाधिः किं स्यात्? न हि जन्यानामपि गुणादीनां सावयवत्वं घटत्वं वा अस्तीति साधनाव्यापकत्वस्य सद्भावात्, अतः साध्यव्यापकत्वम् अपि आश्रयणीयम् । सावयवत्वघटत्वादीनां गुणक्रियादावनित्यत्वव्यापकत्वाभावात् । तथापि शब्देतरत्वस्य अनित्यत्वव्यापकत्वात्, उपाधित्वं स्यादिति तन्निवृत्यर्थं समशब्दः । इदं तु अनुमानं व्याप्तिप्रदर्शनमात्रपरमेव,न स्वसिद्धान्तपरमिति वेदितव्यम् ।

ननु,पर्वतेतरत्वाभावेऽप्यग्निरस्ति चेत् अयं दोषः स्यात् इति तर्कस्य ,संभवे पर्वतेतरस्यग्निव्यापकत्वमेव नास्ति । सत्यं तथापि तस्य व्यापकत्वेनावगमाद् अक्लेशेन तन्निरासार्थं समशब्दः चिदानन्दादिभिः आश्रितः ।

समव्याप्तिमतामेव सर्वथापि ह्युपाधिता ।

इति विस्पष्टतार्थे च समशब्दो न दूषणम् ।।

अस्य च उपाधेः साध्यव्यापकत्वादि अनिश्चये शङ्कितोपाधित्वम्, यथा मैत्रीतनयत्वेन अष्टमगर्भस्य श्यामत्वे शाकादि आहारपरिणाम उपाधिः । अष्टमपुत्रे च तस्य नास्तित्वे स्थिते एव तस्य साधनाव्यापकत्वं भवेत् । स च तत्रापि शङ्क्यत एव इति अनिश्चितमेव साधनाव्यापक्त्वम्, अतः शङ्कितोपाधिरसाविति ।

क्वचिच्च साधनस्य विशेष एव प्रयोजको भवति । यथा 'अयं द्विजो वेदज्ञो भविष्यति,द्विजत्वात् – इत्यत्र बुद्ध्यादिमद् द्विजत्वमुपाधिरिति ।

तस्मादुपाधिमिच्छद्भिः पक्षभूमिमनाप्नुवन् ।

सपक्षान् व्याप्नुवन् धर्मो मृग्यतामिति सङ्ग्रहः ।।

सोयमीदृश उपाधिर्धूमस्य संबन्धे नास्तीति एवासौ संबन्धः । स पुनः स्वाभाविकः संबन्धः कथं गृह्यत इति चेद्, उच्यते- आदौ तावद् महानसादौ भूयो भूयो धूमय अग्निसंबन्धं पश्यन् क्रमेण च महानसत्वगृहत्वग्रामत्वादीनुपाधित्वेनाशङ्क्य व्यभिचारादर्शनेन निरस्यन् अन्यानपि उपाधीन् निपुणं निरूप्य योग्यानुपलाभेन निराकुर्वन् भूयो दर्शनोपाध्यभावग्रहणजनितसंस्कारसहकृतेन इन्द्रियेण सोऽयमेकरूप एव धूमाग्न्योः स्वाभाविकः संबन्धः इति निश्चिनोति इति ।

प्राभाकरास्तु धूमस्य अग्निसंबन्धः सकृद्दर्शनादेव अवगम्यत इति सकृद्दर्शनगम्यैव व्याप्तिः । उपाधिशङ्कानिरासार्थमेव तु भूयो दर्शनमर्थ्यते इति आहुः ।

तदयुक्तम्,अनुमानाङ्गभूत एव संबन्धो व्याप्तिरि उच्यते, निरुपाधिकत्वविशिष्टस्यैव च संबन्धस्य अनुमानाङ्गत्वं न धूमाग्निसंबन्धमात्रस्य । निरुपाधिकत्वावधारनं च भूयो दर्शनसाध्यमेव इति तैः अपि उक्तम्, अतः भूयो दर्शनगम्यैव निरुपाधिकसंबन्धरूपा व्याप्तिः ।

ननु न भूयो दर्शनमात्रेण निरुपाधिकत्वावधारणम्, तस्य मैत्रीतनयत्वश्यामत्वयोरपि भावात् । स्त्यम्, अत एव आह चिदानन्दः – न केवलं भूयोभिर्दर्शनैः तादृशमवधारणं सिध्यतीति प्रमाणोत्पत्यनुगुणस्तर्कोऽपि तत्र सहकारीति । कः पुनः तर्कः ? उच्यते- प्रमाणेन साध्यमानस्य अर्थस्य अन्यथात्वशङ्कायां तन्निरासार्थं अन्यथात्वे दोषकथनं तर्कः । अत एव अनिष्टप्रसङ्गः तर्क इति तार्किकाः । उच्यते-

तर्कोऽनिष्टप्रसङ्गः स्यादनिष्टं द्विविधं मतम् ।

प्रामाणिकपरित्यागस्तथेतरपरिग्रहः ।। इति ।

अयमेव बाधक इति च उच्यते । यथा य्दि अत्र अग्निः न स्यात्,तर्हि धूमोऽपि न स्यादिति । अस्य च तर्कस्य पञ्च अङ्गानि, यदाहुः –

व्यामिस्तर्काप्रतिहतिरवसानं विपर्यये ।

अनिष्टाननुकूलत्वे इति तर्काङ्गपञ्चकम् इति ।।इति ।

अत्र साध्यवैपरीत्यमग्न्याभावादिकमारोप्य तेन लिङ्गभूतेन धूमाभावादि अनिष्टप्रसञ्जनं हि तर्केण क्रियते । तत्र प्रसञ्चकस्य आहार्यलिङ्गस्य प्रसञ्जनीयेन व्याप्तिरेष्टव्या । तथा प्रतितर्कैरप्रतिघातः । प्रसञ्जनीयविपर्यये पर्यवसानम् – एवं चेदेवं स्यात्, न चैवमिति । प्रसञ्जनीयस्य चानिष्टत्वं प्रसिद्दम् । अननुकूलत्वं प्रतिपक्षासाधकत्वमिति ।

अङ्गवैकल्ये च तर्काभासत्वं भवति । व्याप्यभावे यथा – यद्यग्निमत्वं न स्यात्, तर्हि पर्वतत्वमपि न स्यादिति । तर्कप्रतिहतौ यथा – यदीयं मेघोन्नतिः वृष्टिमती न स्यात्, तर्हि निबिडापि न स्यादिति तर्कस्य यदीयं वृष्टिमती स्यात्,तर्हि वतोद्रेकवती न स्यादिति तर्केण प्रतिहतिः । विपर्ययपर्यवसानाभावे यथा शब्दोऽनित्यः कृतकत्वादिति मीमांसकं प्रति कृतकोऽपि न स्यादिति तर्कः । तत्र कृतकश्चायमिति पर्यवसाययितुं न शक्यते, मीमांसकपक्षे श्ब्दस्य कृतकत्वाभावात् । इष्टत्वमपि अत्रैव, कृतकत्वाभावस्य तं प्रति इष्टत्वात् । अनुकूलत्वे यथा – अनुमेयं कर्म, कर्मत्वात्, आदित्यकर्मवद् – इत्यत्र अन्यथा कर्मैव न सिध्येदिति तर्कः । स च प्रत्यक्ष्वादिनामपि अनुकूलः, तैरपि प्रत्यक्षत्वं साधयित्वा अन्यथा कर्मैव न स्याद् – इति वक्तुं शक्यत्वादिति । आत्माश्रयत्वादयश्च दोषाः तर्के एव अन्तर्भूताः अनिष्टप्रसङ्गरूपत्वात् ।

स्वेनैव स्वस्य सिद्धिर्या तदात्माश्रयदूषणम् ।
अनेनान्यस्ततश्चायमित्यन्योन्याश्रं भवेत् ।।
अनेनान्यस्ततश्चान्यस्ततोऽसाविति चक्रकम् ।
अतीतास्पृष्टमन्यान्यग्रहणं त्वनवस्थितिः ।।
गौरवं लाघवं चेति तर्कौ सर्वात्रिकावुभौ ।
गौरवं कल्पनाधिक्यं लाघवं त्वल्पकल्पना ।।
दोषप्रसङ्गरूपत्वं गौरवस्यैव विद्यते ।
साध्ये गुणकथाद्वारा लाघवस्य प्रसङ्गता ।।
साध्याभावानुवादेन दोषः साध्ये गुणोऽपि वा ।

यत्रानुकूलतर्कोऽसौ साध्यसिद्धावनुग्रहात् ।।

साध्यस्यैवानुवादेन यदनिष्टप्रसञ्जनम् ।

स तर्कः प्रतिकूलः स्यात् साध्यसिद्धिनिरोधनात् ।।

कार्यजननमङ्गीकृतं स्याद्- इति तर्के प्रयुक्ते तदपि किं न स्यादिति शङ्का न लोकविदामङ्गीकुर्वन्ति ।

ननु तथा धूमस्याग्निः कारणम्- इति कुतो निर्णीयत इति शङ्का नापैति । मैवम् , यदि अग्निः कारणं न स्यात्, तर्हि कारणान्तरानुपलम्भेन धूमस्य निष्कारणत्वमेव प्रसजेदिति तर्के सति समस्तविजयात् । तदेवं तर्कव्यभिचारशङ्कायां सर्वतो निरुद्धायां उपाध्यन्तरशङ्का कथमिति विधूतैव ।

ततश्च अदृश्योपाधिशङ्का सर्वथा दुर्वारा इति चार्वाक दुर्वादः अपि निर्वासित इति ।

अथवोपाधिशङ्कैव तर्कैर्निष्कास्यते स्फुटम् ।

उपाधिर्मानयोग्यो वा तद्योग्योऽथवा भवेत् ।।

अयोग्यश्चेन्न शङ्क्येत योग्यश्चेत् किं न दृश्यते ।

अनुमानादि गम्यश्चेत् लिङ्गादिः किं न दृश्यते ।। इत्यादि ।

ततश्च-

शङ्कव्याघातपर्यन्तमेवं सर्वानुमास्वपि ।

तर्कजालं प्रयोक्तव्यमल्पं चेदमुच्यते ।।

यतः प्रत्यक्षशब्दादिप्रमाणान्यखिलान्यपि

तर्कं विना न जीवन्ति प्रत्यक्षे तावदीक्षताम् ।।

अयं घट इति प्रत्यक्षं हि सुगतकथितपरमाणुगोचरतापराणादिना तर्केण अनुगृहीतमेव अवयवगोचरं भवति । यदि परमाणुगोचरता स्यात्, तर्हि एकत्वेन महत्वेन चावभासो न स्यात्, तर्हि इदं गोत्वे इति प्रतीतिः स्यात्- इति तर्केण अनुगृहीतमेव अभेदस्यापि ग्राहकं भवति इत्यादि ।

एवं शाब्देऽपि ब्रूमः – अद्ध्ययनविधिरेव तावद् यदि स्वर्गफलकःस्यात्, तर्हि दृष्टार्थत्वे संभवति अदृष्टग्रहणाद् गौरवं स्यात् – इति तर्कानुग्रहेण अर्थज्ञानफलबोधको भवति । 'यदि अर्थज्ञानफलकः स्यात्, तर्हि विधिवैयर्थं स्यात् – इति प्रतिकूलतर्कश्च तत्र तत्र निरसनीयः । तथा –

उपनीयः तु यः शिष्यं वेदमध्यापयेत् द्विजः ।

सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ।।

इति स्मृतिः यदि अध्यापनविधिः स्यात्, तर्हि तु यो द्विजः तमाचार्यं प्रचक्षते इति अंशेन एकवाक्यतया न स्यात् – इति तर्केण आचार्यलक्षणपरता निश्चीयतेऽस्याः स्मृतेः । तथा 'अक्ताः शर्करा उपदधाति' – इत्यत्र यदि घृतेन अञ्जनं न स्यात्, तर्हि 'तेजो वै घृतम्' – इति वाक्यशेषो विरुध्यते – इति तर्कात् घृताञ्जनपरतया साध्यते इति ।

एवं सर्वत्र तर्कौघैः अर्थाभासनिरासतः ।

वाक्यार्थस्थापनो सर्वा मीमांसा तर्करूपिणी ।। इति ।

उक्तं च मनुना –

आर्षं धर्मोपदेशं च वेदशास्त्रविरोधिना ।

यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ।। इति ।

एवम् उपनार्थापत्याभावेष्वपि तत्र तत्र तर्कापेक्षणमूहितव्यः ।

तस्मात्सर्वप्रमाणानां तर्कोऽनुग्राहकः स्थितः ।

साध्ये विपर्ययाशङ्काविच्छेदस्तदनुग्रहः ।।

अस्याविज्ञाततत्वोऽर्थः सन्दिग्धो विशयो मतः ।

हेतुरारोपितं लिङ्गं फलं तत्वार्थनिर्णयः ।।

तदेवं तत्वसिध्यर्थं अन्यथानिष्टवर्णने ।

प्रसरत्यसदारोप – तत्साधनपरम्परा ।।

तत्राचारोपवादेऽपि सिद्धान्तत्वभ्रमः क्वचित् ।

वेदश्चेदीश्वराभावः सिद्धान्त इति मन्वते ।

असंभाव्य चारोपादसंतोषः क्वचिद्भवेत् ।।

अपकर्षाप्रतिष्ठश्चेत्परमाणुस्तथा सति ।

अनन्तावयवारम्भान्मेरुसर्षपयोर्द्वयोः ।।

स्यात्तुल्यपरिंआणत्वमित्याद्युक्तिर्यथा भवेत् ।

तत्र चास्य प्रमाणस्य तर्कोऽयं तस्य सिद्धये ।।

अन्यदुक्तमिति व्यक्तं विविञ्चन्नैव मुह्यति ।

तस्मात्तर्कप्रकारोऽयं प्रसङ्गप्रापितो सन् ।।

अत्यन्तमुपकारीति विस्तरात्प्रस्तुतो मया ।

तदेवं तर्कसहायेन भूयो दर्शनेनैव निरुपाधिकसंबन्धोऽवतार्यते ।।

भूयो दर्शनतः शक्या दृश्योपाधिनिराक्रिया ।

अदृश्योपाधिशङ्का तर्कैरेव निरस्यते ।।

इति विभागः ।अतः सिद्धा व्याप्तिः ।

बौद्धास्तु तादात्म्यतदुत्पत्तिभावेन व्याप्तिसिद्धिरित्याहुः । यथा शिंशपात्वस्य वृक्षत्वेन व्याप्तौ तादात्म्यं धूमस्याग्निना व्याप्तौ तदुत्पत्तिः इति । तन्न । कृत्तिकोदयरोहिण्यासत्योर्व्याप्तौ तदुभयाभावात् । तस्मान्निरुपाधिकत्वावधरणादेव व्याप्तिसिद्धिः ।

व्याप्तिर्नियमः प्रतिबन्धोऽव्यभिचारस्तथाविनाभावः

व्याप्तं पुनर्नियम्यं गमकं लिङ्गं च साधनं हेतुः ।

इत्युभयोः पर्याया इति तस्य तु दर्शनं त्रिविधम् ।।

व्याप्तिग्रहणवेळायां धूमदर्शनं प्रथमम् । पर्वतोपान्तगतस्य धूमदर्शनं द्वितीयम् । ततश्च व्याप्तिस्मरणानन्तरं तादृशो धूमोऽत्रास्तीति यदनुसन्धानं तत्तृतीयम् । तदत्र व्याप्यदर्शनमभिमतं तदनन्तरमेव वह्निज्ञानस्य उत्पत्तिरिति ।

असन्निकृष्टपदेन पुनः किमुच्यते ? अपरिच्छिन्नमिति ब्रूमः, तदुक्तम्-

असन्निकृष्ट्वाचा च द्वयमत्र गिहासितम् ।

ताद्रूप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वा ।।

पूर्वं स्त्ये न परिच्छिन्ने ह्यग्न्यादौ अनुवादः स्यात् । असत्वेन परिच्छेदे च बाधितत्वेन अप्रामाण्यम्त्र्व, इति तदुभयनिवर्तनार्थं असन्निकृष्टपदमिति ।

अत्र चार्वाकाः – अग्निविशेषस्य अनुमेयत्वे व्यात्यसिद्धिः अग्निसामान्यस्यैव धूमसामान्येन व्याप्तेः । सामान्यस्यानुमेयत्वे तु तस्य पूर्वमेव परिच्छिन्नत्वात् सिद्धसाधन्त्वम् । तथा च असन्निकृष्टपदमप्ययुक्तम् । तदुक्तम्-

अनुभामङ्केऽस्मिन्निमग्ना वादिदन्तिनः ।

विशेषेऽनुगमाभावः सामान्ये सिद्धसाधनम् ।। इति ।।

अत्रोच्यते- न तावत्सामान्ययोरेव केवलयोर्व्याप्तिसिद्धिः । तथा च सति धूमत्वेन वह्नित्वं स्वतः संबन्धमिति व्याप्तिग्रहः स्यात् । तथा च वह्नित्वजातिसंबन्धात् धूमत्वमेव वह्निः स्यात्, अतो विशेषद्वारेण सामान्ययोर्व्याप्तिः सिद्ध्यति । विशेषश्च तत्र तत्र विभक्तत्वान्न नियतो निरूपयितुं शक्यत इति अनियतविशेषालिङ्गितयोर्व्याप्तिरिति स्थितिः । ततश्च पर्वतवर्तितया दृष्टो धूमोऽनियतविशेशालिङ्गितमग्निं पर्वतेऽनुमापयति । इह च यद्यपि अनियतविशेषालिङ्गितमग्निसामान्यं व्याप्तिवेळायामेव गृहीतं तदेव चानुमेयं तथापीदानीं पर्वतेऽग्निरस्ति इति देशकालविशेषस्यापि अनुमीयमानत्वात् तस्य पूर्वमप्राप्तत्वात् सिद्धसाध्यत्वस्य अनवकाश इति ।

व्याप्तिश्च पक्षधर्मत्वानुमाङ्गं द्वयं विदुः ।

व्यात्या ह्युक्तप्रकारेण वह्निसामान्यवेदनम् ।।

धूमस्य शैलनिष्टत्वरूपया या पक्षधर्मता ।

तया पर्वतसंबन्धो वह्नेरप्यवगम्यते ।। इति ।।

गुरुस्ताह- धूमवतो देशस्य वह्निनत्वमप्यस्तीति व्याप्तिवेळायामेव गृहीतत्वाद् धूमवत्वमेव पर्वतस्येदानीं अपूर्वं गृहीतव्यम् । अग्निमत्वं तु तस्य पूर्वगृहीतमेवावगम्यते इति । तदयुक्तम्, धूमवत्वं तावत्पर्वत स्येदानीमेव गृह्यत इत्युक्तम् । अतः कथं धूमवत्वप्राप्तिं विना अत्र वह्निमत्वप्राप्तिःपूर्वमासीदित्यविचारयतो गुरोरयमुन्माद इति ।

अतः सिद्धं असन्निकृष्तज्ञानस्य अनुमानत्वम् । अत्र च प्रागुक्तप्रकारेण प्राक्त्यरूपानुमितिकरनत्वादेव ज्ञानस्यानुमानत्वम् । ज्ञानरूपानुमितिकरणत्वाच्च धूमादेः अपि अनुमानत्वमस्त्येव । इति ।

तच्च अनुमानं त्रिविधं अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति । द्वेधा हि व्याप्तिः अन्वयव्याप्तिः व्यतिरेकव्याप्तिः च इति । तत्र साधनस्य सद्भावे साध्यस्यापि सद्भावः अन्वयव्याप्तिः,साध्यस्य अभावे साधनस्य अपि अभावो व्यतिरेकव्याप्तिः । व्यतिरेके च व्याप्यव्यापकभावोऽन्वयाद्विपरीतो भवति । अग्न्यभावौ ह्यत्र व्याप्यः । धूमाभावश्च व्यापक इति ।

अग्नेर्भावस्य भूयस्त्वादभावोऽल्पतां व्रजेत् ।

धूमभावस्य चाल्पत्वात्तदभावो महत्तरः ।।

इति वैपरीत्यस्य उपपत्तिः । तत्र यस्य उभयविधा व्याप्तिरस्ति तदन्वयव्यतिरेकि । यथा धूमानुमानादि । तत्र हि धूमस्य अग्न्यभावो धूमाभावश्च महाह्रदादौ दृश्यते, तदन्वयव्यतिरेकत्वम् । यस्य पुनरन्वयव्याप्तिरेव अस्ति तत्केवलान्वयि, यथा – ज्ञानं ज्ञानान्तरप्रकाश्यम्, वस्तुत्वाद्, घटवद्- इत्यादि । अत्र हि ज्ञानप्रकाश्यत्वाभावे वस्तुत्वाभावो न क्वचिदपि दर्शयितुं शक्यः, सर्वेषामपि अर्थानां ज्ञानप्रकाश्यत्वात् । अतो व्यतिरेकव्याप्त्यभावः । यस्य तु व्यतिरेकव्याप्तिरेव अस्ति तत् केवलव्यतिरेकि । यथा – सर्वं ज्ञानं स्वप्रकाशकं ज्ञानत्वात् । यस्य स्वप्रकासत्वं नास्ति ज्ञानत्वमपि नास्ति, यथा घटस्य इति । अत्र हि स्वप्रकाशत्वं तस्य ज्ञानत्वमपि अस्तीति क्वचिद्दर्शयितुमशक्यत्वाद्,अन्वयव्याप्तिर्नास्ति । स चायं केवलव्यतिरेकी हेतुरतीवहेतुरिति चोच्यते ।

तं च कौमारिलाः प्रायो नेच्छन्ति व्यतिरेकिणम् ।

तत्स्थाने चाभिषिञ्चन्ति पञ्चमीं प्रमितिं पुनः ।।

क्वचित्प्रसिद्दमन्यत्र साध्यते ह्यनुमानतः ।

स्वप्रकाशत्वधर्मो हि सिद्दो नान्यत्र कुत्रचित् ।।

तेन तत्साधने पक्षो ह्यप्रसिद्धविशेषणः ।

एवं च दुष्टपक्षोऽयं व्यतिरेकी निवार्यताम् ।।

यच्चानुकूलतर्के सत्यप्रसिद्धविशेषणः ।

न दोष इति भाषन्ते तार्किकास्तदसङ्गतम् ।।

तर्को हि नाप्रसिद्धार्थे क्वचित्साधयितुं क्षमः ।

अतोऽप्रसिद्धतादोषस्तर्के सत्यपि दुस्त्यजः ।।

ननु वेद्यत्वं क्वचिदत्यन्तं नास्ति, धर्मत्वात्, यथा घटत्वं पटादिषु – इत्यनेनानुमानेन वेद्यत्वविरहरूपे स्वयं प्रकाशत्वे सामान्यतः प्रसिद्धे पुनर्विशेषेण पक्षे साध्यते इति नाप्रसिद्धविशेषणत्वं पक्षस्य । तदुक्तम् –

सामान्यतोऽनुमानेन प्रसिद्धेऽपि विशेषणे ।

कथं कथय पक्षोऽयमप्रसिद्धविशेषणः ।। इति ।।

अस्तु वा तर्ह्येवम् –

अत एव चिदानन्दः केवलव्यतिरेकिणम् ।

नैवसाक्षान्निराचक्रे नापि साक्षादुपाददे ।।

तस्मात्सामान्यतः सिद्धिहीनाश्चेद्वयतिरेकिणः ।

सर्वथा वारणीया इत्येतत्तवद्व्यवस्थितम् ।।

इह च स्वप्रकाशत्वे नास्ति सामान्यतोऽनुमा ।

वस्तुत्वादेर्हि धर्मस्य नात्यन्तं नास्तिता क्वचित् ।।

अत्र चान्वयव्यतिरेकिहेतोः पञ्चरूपाणि – पक्षधर्मत्वम्,सपक्षे सत्वम्,विपक्षाद्व्यावृत्तत्वम्,अबाधितविषयत्वम्,अस्त्प्रतिपक्षत्वं चेति । तत्र जिज्ञासितसाध्यः पर्वतादिः पक्षः, तन्निश्थत्वं हेतोः पक्षधर्मत्वम् । निश्चितसाध्यो महानसादि सपक्षः,तत्र वर्तमानत्वं सपक्षे वृत्तित्वम् । निश्चितसाध्यभावो

महाह्लदादिर्विपक्षः, तत्र अवर्तमानत्वं विपक्षाद्व्यावृत्तिः । साध्यस्याबाधित्वं अबाधितविषयत्वम् । प्रतिहेत्वभावोऽसत्प्रतिपक्षत्वम् इति ।

केवलान्वयिनस्तु विपक्षाद्व्यावृत्तिर्नास्ति, विपक्षाभावाद्, अतस्तस्य चत्वारि रूपाणी । केवलव्यतिरेकिणः सपक्षे सत्वं नास्ति, सपक्षाभावात् । यदि तु सपक्षे सत्यपि पक्षमात्रवृत्तिर्हेतुः स्यात्, तर्ह्यसाधारणो नाम हेत्वाभास एव स्यात् । यथा – नित्या भूः गन्धवत्वात् – इति । अत्र हि नित्यत्वेन सपक्षभूतानामाकाशादीनां सद्भावेऽपि भूमात्रवृत्ति गन्धवत्वम् । अतः असति सपक्षे पक्षमात्रवृत्तिः केवलव्यतिरेकी- इति लक्षयन्ति तार्किकाः ।

पक्षमात्रस्थितं सिध्येत्पक्षमात्रस्थहेतुना ।

अन्यत्र स्थितमाकृष्टुं तद्गतस्यैव पाटवम् ।।

अतः सपक्षे सत्त्वाभावच्चतुरूप एव व्यतिरेकी । तत्सिद्धं द्वैविध्यं त्रैविध्यं च अनुमानस्य ।

तच्च पुनरपि द्वेधा दृष्टसामान्यतो चेति । तत्र-

दृष्टैकव्यक्तिविषयं दृष्टमिष्टं हि मादृशाम् ।

कृत्तिकोदयमालक्ष्य रोहिण्यनुमितिर्यथा ।।

एवं सामान्यतो व्याप्तिदृष्ट्या यत्रानुमीयते ।

तद्धि सामान्यतो दृष्टं यथा वह्न्यनुमादिकम् ।।

व्याप्त्येकशरणं तावदनुमानमिति स्थितम् ।

तद्व्याप्तिदर्शितान्मार्ग्गाच्चलितुं क्षमते कुतः ।।

ततश्च व्याप्तिविज्ञाने यादृशं वस्तु विद्यते ।

तादृगेवानुमातव्यं यथोष्णो वस्तु विद्यते ।

न चातोन्द्रियवस्तूनां  प्राग्दृष्टाकारयोगिता ।।

दृश्यत्वं तेजसां दृश्टं चक्षुषश्तदसंभवात् ।।

अत एव हि सर्वत्राप्यत्यन्तादृष्टसाधने ।

विशेषबाधकं नाम दोषं घोषयितास्महे ।।

तस्माद्रूपादिसंदर्सनान्यथानुपपत्तितः ।

चक्षुराद्याः प्रसाध्यन्ते न तेष्वनुमितिर्मता ।।

तच्चानुमानं स्वार्थपरार्थभेदेनापि द्विविधमाहुः । यत्र स्वयमेव धूमादिकं दृष्ट्वा व्याप्त्यादिनिरूपणेन अनुमीयते तत्वार्थम् ।

यदा पुनः स एवार्थः परवाक्येन बोध्यते ।

तदा परार्थमित्याहुस्तयोरेतावतो भिदा ।।

तत्र पराथानुमानवाक्यं प ञ्चावयवमिति तार्किकाः-

१.प्रतिज्ञा २.हेतुः ३. उदाहरणं ४.उपनयः ५.निगमनम् इति ।

- प्रतिज्ञा - अयं पर्वतो अग्निमान्, धूमत्वाद् ।
  अत्र परं बोधयितुं पक्षवचनं प्रति ज्ञा ,पर्वतोऽग्निमान् - इति ।
- हेतुः - यो यो धूमवान् स स अग्निमान् ,
  साधन्त्वावेदकं लिङ्गवचनं हेतुः, धूमत्वाद् – इति
- उदाहरणम् - यथा महानसः । व्याप्तिप्रदर्शनपुरस्सरं दृष्ठान्ताभिधानमुदाहरणम्,यो यो स सोऽग्निमान् यथा महानस - इति ।

- उपनयः - धूमवांश्चायम् ।
  सिद्धव्याप्तिकस्य पक्षे उपनयनमुपनयः धूमवांश्चायम् – इति ।

- निगमनम् - तस्मादग्निमानेव इति ।

सहेतुकं पक्षस्य पुनर्वचनं निगमनम् । तस्मादग्निमान् – इति ।

अत्र ब्रूमः –

प्रतिज्ञया निगमनं हेतुनोपनयस्तथा ।

गतार्थ इति कः कुर्यात्पञ्चावयवघोषणम् ।।

तस्मात् त्र्य्यवयवं ब्रूमः पौनरुक्त्यासहा वयम् ।

उदाहरणपर्यन्तं यद्वोदाहरणादिकम् ।।

सौगतास्त्वाहुः – यो धूमवान्,सोऽग्निमान् यथा –न् धूमवांश्चायं – इत्येतावदुक्तौ तस्मादग्निमान् इति अर्थात्सिद्ध्यति । अत उअदाहरणोपनयौ द्वावेवावयवौ इति । तदपि साध्यांशे अध्याहारदोषप्रसङ्गादपस्तम् ।

तदेवं पौनरुक्त्येन तथाध्याहारदोषतः ।

तर्कबौद्धमते हित्वा वयं त्र्यवयवे स्थिताः ।।

तत्र उदाहरणान्तं यथा – पर्वतोऽग्निमान्,धूमवत्वाद्, यो धूमवान् सोऽग्निमान्, यथा – महानसः इति । उदाहरणादिकं यथा – यो धूमवान् सोऽग्निमान् यथा – महानसः, धूमवांश्चायम्, तस्मादग्निमान् – इति ।

अथ प्रतिज्ञाहित्वोश्च दृष्टान्तस्य च दूषणम् ।

क्रमेण कथ्यतेऽस्माभिर्यद्वेद्यं वादिनां पुरः ।।

**१ - प्रतिज्ञाभासाः –**

तत्र वरप्रतिपादनार्थं पक्षवचनं हि प्रतिज्ञा । जिज्ञासितधर्मविशिष्टश्च पक्ष इत्युक्तम् । ततश्च तद्रूपपरिच्छेदद्वा अन्यत्राप्रसिद्धत्वाद्वा यो न जिज्ञासितो धर्मः, तद्विशिष्टस्य न पक्षत्वम् – इति सिद्धिविशेषणे बाधितविशेषणोऽप्रसिद्धविशेषणश्च पक्षभासा एवेति तदावेकं वचनमपि प्रतिज्ञाभास एव । तद्यथा – वह्निरुष्ण इति बाधितविशेषणः, क्षित्यादिकं सर्वज्ञकर्तृकं इत्यप्रसिद्धविशेषणः , घटादिषु क्वचिदपि सर्वज्ञकर्तृत्वस्याप्रसिद्धत्वात् ।

बाधकप्रमाणभेदेन बाधितविशेशणत्वावान्तरविशेषो द्रष्टव्यः । तत्र वह्निरनुष्न इति प्रत्यक्षबाधः पूर्वमुक्तः । अनुमान्स्यापि यदा प्रबलत्वं स्पष्टं भवति तदा अनुमानबाधः, यथा – मन इन्द्रियं न भवति, अभूतात्मकत्वाद्, दिगादिवद् – इति । अत्र इन्द्रियत्वेन मनसोऽनुमीयमानत्वात् मनोधर्मिग्राहकेण एव अनुमानेन तस्य अनिन्द्रियत्वं बाधितम् । एवं शीघ्रभाविनां अनुमानानां सर्वत्र बाधकत्वं द्रष्टव्यम् ।

शाब्दबाधो यथा – यागादयः स्वर्गसाधनं न भवन्ति, क्रियात्वाद्, गमनवद् – इति । अत्र स्वर्गकामो यजेत इत्यादिवाक्यैः यागादेः स्वर्गसाधनत्वबोधनात् तदभावः शाब्दबाधितः । यथा वा – स्पृश्यं नरास्थि प्राण्यङ्गत्वात्, शङ्खवद् – इति ।

गौः गवयसदृशो न भवति, प्राणित्वाद्, पुरुषवद्, - इत्यत्र उपमानबाधः । देवदत्तो बहिर्नास्ति, तत्र अदृश्यमानत्वाद् – इत्यत्र अर्थापत्तिबाधः, अर्थापत्या बहिरभावस्य बाधितत्वात् । रूपवान् वायुः, द्रव्यत्वात्, पृठिवीवद् – इत्यत्र अनुपलम्भबाधः । अन्येऽपि प्रतिज्ञादोषाः सन्ति –

यावज्जीवामहं मौनीत्युक्तो हि स्वोक्तिबाधनम् ।

नेन्दुश्चन्द्रगिरा वाच्य इति लोकविरुद्धता ।

शब्दादेः प्रागनित्यत्वमुक्तं येनैव तेन तु ।

नित्यत्वे पुनरुक्ते स्यात् पूर्व संजल्पबाधनम् ।।

## २. हेत्वाभासाः –

व्याप्तः साधन्धर्मो हेतुः । असिद्धः विरुद्धः अनैकान्तिकः असाधारणः चेति चत्वाराः तदाभासाः ।

१. तत्र असिद्धः उच्यते –

हेतोः व्याप्तिमतः पक्षसंबन्धित्वेन वेदनम् ।
सिद्धिरित्युच्यते हेतुसंपूर्तिस्तावदेव हि ।।
तेषामेकतमांशस्याप्यभावे स्यादसिद्धता ।
हेतोह् व्याप्तेश्च पक्षस्य संबन्धस्य ग्रहस्य च ।।

तत्र हेतुस्वरूपस्य एव असिद्धौ स्वरूपासिद्धिः, यथा – बुधो मोहरहितः, सर्वज्ञत्वाद् – इत्यत्र सर्वज्ञत्वं नाम नास्माकं कवचित्सिद्धम् । अस्य विशेष्यासिद्ध

इति द्वौ भेदौ धर्मोपदेष्टा सर्वज्ञत्वे सति शरीरित्वाद् – इति । अन्यस्तु शरीरित्वे सर्वज्ञत्वाद् – इति ।

व्याप्त्यभावे व्याप्यत्वासिद्धः, । यथा – क्रतुहिंसा अधर्मः, हिंसात्वाद् – इत्यत्र सोपाधिकत्वाद् व्याप्त्यभावः । पक्षाभावे त्वास्रयासिद्धः । यथा – गगन्कुसुमम् सुरभि, कुसुमत्वाद् – इति ।

हेतोः पक्षसंबन्धाभावे संबन्धासिद्धः, यथा – शब्दोऽनित्यः चाक्षुषत्वादिति । यस्य तु पक्षैकदेशे संबन्धो नास्ति, स भागासिद्धः । स एव पक्षव्याप्त्यभावाद् व्याप्त्यसिद्ध इति च क्वचिदुच्यते, यथा – वेदाः पौरुषेयाः, उपाख्यानात्मकत्वादिति । यदा तु विशेषणस्य विशेष्यस्य व पक्षसंबन्धो नास्ति, तदा विशेशणासिद्धविशेष्यासिद्धौ भवतः, यथा – अनित्यं गगनं, जन्यत्वे सति द्रव्यत्वादिति, द्रव्यत्वे सति जन्यत्वाद् इति च । यत्र तु विशेशनं व्यावर्त्याभावाद् व्यर्थमेव इति संबन्धानर्हं भवति, स व्यर्थविशेशणासिद्धः, यथा – घटोऽनित्यः, द्रव्यत्वे सति कृतकत्वादिति । एवं कृतक्त्वे सति द्रव्यत्वादिति व्यर्थविशेष्यासिद्धः । यदा तु हेतुः पक्षसंबन्धित्वेन न प्रयुज्यते किन्तु आश्रयान्तरसंबन्धित्वेन, तदा व्यधिकरणासिद्धः, यथा – अनित्यो घटः,तद्गुणस्य कृतकत्वादिति । अत्र न घटाश्रितं कृतकत्वं किं तु तद्गुणाश्रितमिति व्यधिकरणासिद्धः, यथा – अनित्यं गगनं गगनत्वादिति । अत्र गगनस्वरूपादन्यद् गगनत्वं नाम नास्तीति । एषां स्वरूपादीनाम् अज्ञाने अज्ञानासिद्धः संदिग्धासिद्धौ वा भवति, यथा देवदत्तो बहुधनो भविष्यति, तद्देतुभूताद्रुष्टशालित्वादिति । अत्र तादृशादृष्टसद्भावे प्रमाणं नास्तीत्यज्ञातत्वम् । एवं अग्निमान् पर्वतः, धूमवत्वाद् – इत्येतावत्प्रयोगेऽनुपदर्शितव्याप्तिकत्वाद् व्याप्त्यज्ञानासिद्धः । एवमेव सन्दिग्धविशेशणासिद्धादयोऽप्यज्ञातासिद्धभेदा ऊहितव्याः ।

तार्किकास्तु पक्षे हेतुस्वरूपाभाव एव वस्वरूपासिद्धिरिति संबन्धासिद्धस्य स्वरूपासिद्धत्वमाहुः, तदुक्तम्, सर्वज्ञत्वादेः स्वरूपमेव क्वचिदपि नास्ति चाक्षुषत्वादेस्तु पक्षसंबन्धमात्रं नास्तीति पृथक्त्वप्रतीतेः ।

एते चासिद्धभेदाः यदान्यतरस्यैव वादिनोऽसिद्धा भवन्ति तदान्यतरासिद्धा इत्युच्यते । तत्र बुद्धो मोहरहितः, सर्वज्ञत्वाद् – इत्युक्तोऽस्माकमेवासिद्धः । एवमुभयोरपि असिद्धौ उभयासिद्धता वेदितव्याः, यथा – शशो हिंस्रः, विषाणित्वादिति ।

- दिङ्नागस्य मतेन असिद्धं चतुर्विधम् – १. उभयासिद्धः २.अन्यतरासिद्धः ३.सन्दिग्द्धासिद्धः ४. आश्रयासिद्धः चेति ।
- श्री पार्थसारथिमिश्रस्य मतेन असिद्धं पञ्चविधम् – १. स्वरूपासिद्धिः २. संबन्धासिद्धिः ३. व्यतिरेकासिद्धिः ४. आश्रयासिद्धिः ५. व्याप्त्यसिद्धिः
- श्री चिदानन्दपण्डितस्य अभिप्रायेण असिद्धं पञ्चविधम् - १. स्वरूपासिद्धः २. आश्रयासिद्धः ३. संबन्धासिद्धः ४. व्यतिरेकासिद्धः ५. भागासिद्धः चेति ।

२- अथ विरुद्धः –

स च बाधक इत्येवं वार्तिके व्यपदिश्यते ।

द्विधा चासौ स्वरूपस्य विशेशस्य च बाधनात् ।।

तत्र साध्यविपरीतव्याप्तः साध्यस्वरूपविरुद्धः, यथा - शाब्दो नित्यः कृतकत्वादिति । अत्र नित्यत्वविपरीतेन अनित्यत्वेन व्याप्तं कृतकत्वमिति नित्यत्वं प्रति विरुद्धत्वात् तस्य बाधकं भवति । साध्यविशेषस्य विपरीतेन विशेषेण व्याप्तो विशेषविरुद्धः, यथा क्षित्यादिकं सकर्तृकम्,कार्यत्वाद्, घतवद् इति । अत्र साध्यस्य क्षित्यादिकर्तृरशरीरत्वं नाम विशेषः । तस्य विपरीतेन शरीरत्वरूपेण विशेषेण व्याप्तं घटादिषु कार्यत्वमिष्टम् – इत्यशरीरित्वस्य बाधकं भवति ।

अशरीरत्वबाधे च कर्तृमत्तपि बाध्यते ।

प्रत्यक्षात्सशरीरत्वविशेषे बाधिते सति ।।

अशरीरित्वमादाय स्थास्यामीति कृतोद्यमा ।

कर्तृमत्ता हि तस्यापि बाधे नश्येन्निराश्रया ।।

इथं साध्यनिरोधित्वादेष दूषणमेव नः ।

तमीदृशमजानद्भ्यस्तार्किकेभ्योऽयमञ्जलिः ।।

सव्यभिचारो अनैकान्तिकः । विपक्षे अपि वर्तमान इति यावत् । स एव साधारण इति चोच्यते । यथा – अनित्यः शब्दः, प्रमेयत्वाद् इति । अत्र हि प्रमेयत्वं नित्येष्वपि वर्तत इत्यनैकान्तिकम् । यत्र तु विपक्षवृत्तित्वं सन्दिग्धम्, स सन्दिग्द्धानैकान्तिकः, यथा – क्षणिका भावाः सत्वाद् – इत्यत्र अक्षणिकत्वे अपि सत्वस्य बाधाभावाद् विपक्षवृत्तिः शङ्किता भवति ।

सति सपक्षे पक्षमात्रवृत्तिरसाधारणः, यथा – नित्या भूः गन्धवत्वादिति । केचित्पुनराहुः – असाधारणोऽपि अनैकान्तिक एव । यथा – खलु अन्वयस्य विपक्षे अपि वर्तनात् व्यभिचारित्वम्, एवं व्यतिरेकस्यापि स्वस्थानभूतं विपक्षमतिक्रम्य सर्वेषु सपक्षेष्वपि वर्तमानाद् गन्धवत्वस्यापि व्यभिचारित्वमस्तीति ।

सत्यं किंत्वन्वयस्यैव स्वस्थानादतिलङ्घनम् ।

व्यभिचारतया ख्यातं क्लिष्टस्त्वदुदितः क्रमः ।।

तेन साधारणस्यैव व्यभिचारित्वमीरितम् ।

हेत्वाभासान्तरत्वेन चासाधारण ईरितः ।

यद्वा त्वदुक्तमार्गेण तस्यापि व्यभिचारतः ।

अनैकान्तिकतैवास्तु नास्माकं काचन् क्षति ।।

तस्मात्रेधा चतुर्था वा हेत्वाभासा व्यवस्थिताः ।

पञ्चधा तार्किकाः प्राहुः षोढ्यान्ये तदसङ्गतम् ।।

असिद्धविरुद्ध अनैकान्तिक प्रकरणसमकालात्ययापदिष्टेन पञ्चधा इति तार्किकाः । अप्रयोजकः षष्ठ इति केचित् । अनध्यवसित एव षष्ठ इति भासर्वज्ञः । तत्र प्रतिहेतुमान् हेतुः प्रकरणसमः सत्प्रतिपक्ष इतिच उच्यते । यथा – अप्रत्यक्षो वायुः, अरूपवत्वाद् मनोवत् । प्रत्यक्षो वायुः,स्पर्शत्वाद्, घतवदिति । सोऽयमुक्तेष्वेव अन्तर्भाययितव्यः । तथा हि – तुल्यबलं विरुद्धहेतुद्वयं तावन्न संभवति । तथा सति एकस्यैव वस्तुनः अनुमानद्वयबलप्रापितविरुद्धरूपद्वयप्रसङ्गात् । प्रबलदुर्बलयोः विरोधे दुर्बलस्य प्रबलापहृतविषयत्वेन बाधितविशेशनत्वाभिधं पक्षदूषणमेव इदं, किं हेत्वाभासान्तरकथया ?

ननु हेत्वोः विशेषानवगमवेळायां आभिमानिकतुल्यबलत्वसंभवात् तादात्मिकं प्रकरणसमत्वम् । मैवम्, तदापि बाधितविशेषणत्वस्य सन्देहावस्था एव भवतु । न तु जत्यन्तरमन्वेषणीयम् । अन्यथा सन्दिग्धासिद्धादीनामपि अन्यत्वं स्यात् । अथवा संशयहेतुरनैकान्तिक इति अनैकान्तिकस्य लक्षणमाश्रीयते । साधारणधर्माद् असाधारणधर्माद् विप्रतिपत्तेः च संशयो भवति । यथा – साधारणाद् ऊर्धत्वाद् स्थाणुर्वा ? पुरुषो वा ? इति । असाधारणाच्च गन्धवत्वाद् पृथिवी नित्या ? अनित्या वा ? इति । वादिविप्रतिपत्तेः च शब्दो नित्योऽनित्यो वा ? इति । तत्र विप्रतिपत्तिहेतुकः संशयः प्रतिसाधनप्रयोगे प्राप्त इति अनैकान्तिकेषु एव प्रकरणसमोऽन्तर्भावयितव्यः ।

तस्य चास्य सत्प्ररिसाधनस्य एकेनैव हेतुना प्रतिकूलसाधने विरुद्धाव्यभिचारी नाम अवान्तर्जातिः । यथा – क्षित्यादिकं सकर्तृकं कार्यत्वाद् घटवद् – इत्यत्र क्षित्यादिकमीश्वरकर्तृकं न भवति , कार्यत्वाद् घटवदिति । अत्र हि कार्यत्वं घटादिषु सकर्तृकत्वेन ईश्वरकर्तृकत्वाभावेनापि अव्यभिचरितम् । ईश्वरकर्तृकत्वाभावश्च सकर्तृकत्वमुखेन ईश्वरं साधयतां तेषां विरुद्ध एवेति विरुद्धाव्यभिचारित्वं कार्यत्वस्य ।

एवं परोदितैरेव पक्षहेतुनिदर्शनैः ।

विरुद्धसाधनेऽस्माकं विरुद्धाव्यभिचारिता ।।

सर्वसत्प्रतिपक्षाणां विरुद्धाव्यभिचारिताम् ।

कदादिदूचराचार्या न त्वमुष्यैव केवलम् ।।

चिदानन्देन तु व्यक्तमयमेव तथोच्यते ।

यथा तथास्तु नामैतन्नाभासान्तरमत्र नः ।।

तत्सिद्धं बाधितविशेषणे अनैकान्तिके वा अन्तर्भूतं सत्प्रतिसाधनत्वं नाम दूषणम् ।

भासर्वज्ञस्तु स्वपक्षपरपक्षसिद्धौ अपि त्रिरूपो हेतुः प्रकरनसम इत्युक्त्वा तत्र दुर्लभलब्धमेकमुदाहरणं दर्शयति, यथा-शब्दोऽनित्यः, पक्षसपक्षयोः अन्यतरत्वात्, सपक्षवदिति । अत्र हि सब्दो नित्यःपक्षसपक्षयोः अन्यतरत्वाद्- इत्यपि वक्तुं शक्यमिति ।

तदिदमयुक्तम् इह खलु पक्षसपक्षयोः अन्यतरत्वाद् – इत्यस्य अनित्यत्वे साध्ये घटशब्दयोः अन्यतरत्वाद् इत्यर्थः । नित्यत्वे तु शब्दाकाशयोः अन्यतरत्वादित्यर्थः, अतः कथम् एक एव हेतुः पक्षद्वये अपि समान् इत्युच्यते ?

शब्दसादृश्यमेवात्र विद्यतेऽर्थस्तु भिद्यते ।

तस्माद्विरुद्धधर्माभ्यां व्याप्तिर्नैकस्य संभवेत् ।।

कथं तर्हि भवान् ब्रूते विरुद्धाव्यभिचारिणम् ।

सत्यं न साध्यते तत्र साक्षात्साध्यविपर्ययः ।।

सकर्तृकत्वं वदताभिष्टा हीश्वरकर्तृता ।

सैवात्र वार्यतेऽस्माभिस्तेनार्थात्प्रतिकूलता ।।

भावांस्त्वनित्यनित्यत्वे साक्षादेव विरोधिनी ।

एकेन साधयन्नद्य हास्यतामेव यास्यति ।।

यस्तु बाधितविषयापरपर्यायः कालात्ययापदिष्टो नाम हेत्वाभास उक्तः – अग्निरनुष्णः,अद्रव्यत्वादित्यादिः, सोऽपि बाधितविशेषणो नाम पक्षाभास एव ।

ननु नो पक्षदोषानेव अनुमन्यामहे वयम् ।

पक्षदृष्टान्तदोषाणां हेत्वाभासेषु योजनात् ।।

तत्र सिद्धविशेषणे तावत् –

पक्षः खल्वाश्रयो हेतोर्न च निश्चितधर्मवान् ।

पक्षत्वं भजते तस्मादाश्रयसिद्धिरेव सा ।।

तथैव यदि दोषः स्यादप्रसिद्धविशेषणः ।

तदापि पक्षतानाशादाश्रयासिद्धिरुच्यताम् ।।

किं च – किं पक्षदोषैः कथितैः इदानीं दृष्टान्तदोषा अपि वक्ष्यमणाः ।

अन्तर्गता एव हि हेतुदोषे न हेतुदोषादपरोऽस्ति दोषः ।

तदेवं सर्वदोषेषु हेत्वाभासप्रवेशिषु ।

निःसहायः कथं तिष्ठेत्स बाधितविशेशणः ।।

तस्मादितरदोषवद् बाधितविशेशणोऽपि हेत्वाभासतयैव वक्तव्य इति ।

अत्र ब्रूमः –

आभाससङ्करे तावत्पुरः स्फुरितदूषणम् ।

उद्भाव्यमिति सर्वेषां निर्विवादं हि वादिनाम् ।।

ततश्च पक्षवचने दोषः कोऽपि चकास्ति चेत् ।

पक्षस्यैव स वक्तव्यः किं न्यायं नानुमन्यसे ।।

पक्षदुष्तत्वमाश्रित्यैवोक्ता सिद्धविशेषणे ।

त्वयापि ह्याश्रयासिद्धिः किं पुरोभावि तत्र ते ।।

एवं साध्यस्याप्रसिद्धिस्तथा बाधितसाध्यता ।

पक्षोक्तावेव निर्भातीत्युचिता पक्षदोषता ।।

इत्थं दृष्तान्तदोषाश्च वक्ष्यमाणः समर्थिताः ।

यो यत्र स्फुरितो दोषः स तस्यैवेति निर्णयात् ।।

नावदत्पक्षदोषादीनक्षपादमुनिः पुरा ।

तद्भक्तिमोहिता मा मा न्ययं त्यजत तार्किकाः ।।

तस्माद् बाधितविशेषणः पक्षाभास एवेति न पञ्चमो हेत्वाभासोऽङ्गीकार्य इति ।

ये पुनरनुकूलतर्काभावे हेतोः प्रयोजकत्वं नास्तीति अप्रयोजकं नाम हेत्वाभासान्तरमातिष्ठन्ते,तेऽपि व्याप्यत्वासिद्धमेव तथा मन्यन्ते । सर्वेषु अपि अनुमानेषु अनुकूलतर्कैः व्यभिचारशङ्कामपास्य निरुपाधिकत्वं साधनीयम् । ततस्तदभावे निरुपाधिकसंबन्धानिश्चयाद्व्याप्त्यसिद्धिरेव । सोऽयं व्याप्त्यसिद्धो हेतुः उपाधिमानिति, अन्यथासिद्ध इति, अप्रयोजक इति, परप्रयुक्तव्याप्त्युपजीवति, सन्दिग्धव्याप्तिक इति च व्यपदिश्यते, न तु आभासान्तरम् ।

यत्तु भासर्वज्ञेनोक्तम् – साध्यासाधकः पक्षे एव वर्तमानो हेतुः अनध्यवसितः, यथा – नित्या भूः, गन्धवत्वादिति । सर्वं क्षणिकम्, सत्वादित्यादि च । तत्रादिमः प्रकारोऽसाधारण एव । सर्वं क्षणिकम्, सत्वाद् – इत्यत्र तु सर्वस्य पक्षीकृतत्वात् सपक्षभूतं विपक्षभूतं वा किञ्चिन्नास्तीति अन्वयव्याप्तिर्व्यतिरेकव्याप्तिर्वा न वक्तुं शक्या इति व्याप्त्यसिद्धिरेव इयं न तु आभासान्तरम्,इत्यास्तां तावत् । तस्मादस्मदुक्तैव हेत्वाभासव्यवस्था इति ।

**३.दृष्तान्ताभासाः –**

साध्यसाधनयोः व्याप्तिप्रतिपत्तिस्थलं हि यत् ।

तदुदाहरनं नाम दृष्तान्त इति चोच्यते ।।

तद् द्विविधम्, साधर्म्यवैधर्म्यभेदात् । तत्र साधनस्य साध्येनान्वयोपदर्शनं साधर्म्यम्, यथा – यो धूमवान्,सोऽग्निमान्, यथा – महानस इति । साध्याभावस्य साधनाभावेन अन्वयोपदर्शनं वैधर्मयम्, यथा – योऽग्निमान्न भवति,नासौ धूमवान्, यथा – पाथ इति ।

साध्यहीनः, साधनहीनः, उभयहीनः, आश्रयहीन इति साधर्योदाहरणाभासाश्चत्वारः । तद्यथा – नित्यो ध्वनिः अकारणत्वाद्, यदकारणं तन्नित्यम् – इत्यत्र प्रागभाववदिति साध्यहीनः, नरश्रुङ्गवदित्याश्रयहीनः । नित्यत्वमत्र अविनाशित्वमेव विवक्षितम्, न कोटिद्वयराहित्यम् ।

वैधर्म्योदाहरणाभासा अपि साध्याव्यावृत्तादयश्चत्वारः । यथा – यन्नित्यं न भवति, न तदकारणम् – इत्यत्र यथा – प्रध्वंस इति साध्याव्यावृतः, यथा – प्रागभाव इति साधनाव्यावृतः, यथा – गगनमित्युभयाव्यावृत्तः, यथा – नरशृङ्गमित्याश्रयहीनः ।

अत्र चोभयविधोदाहरणे ऽपि अव्याप्त्यभिधानं विपरीतव्याप्त्यभिधानमिति च दोषौ । तत्र अग्निमान् पर्वतः, धूमवत्वाद्, यथा – महानसः इत्येतावदुक्ते अव्ययाप्त्यभिधानम्, यो धूमवान् सोऽग्निमान् इति व्याप्तेरनुक्तत्वाद् । तथैव यो

अग्निमान् न भवति, नासौ धूमवान् इति व्याप्तिमनुक्त्वैव यथा – महाह्रदः इत्येतावदुक्तेऽपि अव्याप्त्यभिधानम् ।

यदा तु यो धूमवान् सोऽग्निमान् इति वक्तव्ये योऽग्निमान् स धूमवान् – इत्युच्यते, तदा विपरीतव्याप्त्यभिधानम् । तथैव योऽग्निमान् न भवति , नासौ धूमवानिति वक्तव्ये यो धूमवान् न भवति न असौ अग्निमानिति प्रयोगेऽपि द्रष्टव्यमिति ।

अनुमानप्रपञ्चोऽयं बहुभिर्बहुधोदितः ।

चिदानन्दोक्तरीत्या तु मयैवमिह दर्शितः ।।

*************************************